Prasuti Tantram (Prasuti Tantram)
- A Text Book of Midwifery -
By कविराज यामिनीभूषण राय कविरत्न.
Calcutta, 1952.

1391

1

Bill No. 3/07-08

161.

2008-0326

Indira Gandhi National Centre for the Arts

# PROSUTI TANTRAM
## A TEXT BOOK OF MIDWIFERY.

*By*

Kaviraj Jamini Bhushan Ray, Kaviratna,
M. A., M. B., M. R. A. S.
Ex-President, All-India Ayurvedic Conference and
Ayurveda Vidyapitha
( All-India Board of Ayurvedic Education )
Fellow Calcutta University, Benaras
Hindu University, Etc.

Indira Gandhi National
Centre for the Arts

1391

*Published by*
Kaviraj Amarbhushan Ray
VISHAGACHARYA
46, Beadon Street,
CALCUTTA-6

*Copyright Reserved*

Indira Gandhi National
Centre for the Arts

*Printed by*
Hazarilal Sharma
at
Janabani Press & Publications Ltd.,
36, Baranashi Ghose Street,
CALCUTTA - 7

# PROSUTI TANTRAM

## A TEXT BOOK OF MIDWIFERY.

*By*


**Kaviraj Jamini Bhushan Ray, Kaviratna,**

M. A., M. B., M. R. A. S.

Ex-President, All-India Ayurvedic Conference and

Ayurveda Vidyapitha

( All-India Board of Ayurvedic Education )

Fellow Calcutta University, Benaras

Hindu University, Etc.


Indira Gandhi National
Centre for the Arts

---


*Published by*

KAVIRAJ AMAR BHUSHAN RAY

**VISHAGACHARYA**

**46, Beadon Street,**

CALCUTTA-6.

1952


[redacted]

***Copyright Reserved.***

SANS
618.20233
RAY

DATA ENTERED
Date 26/06/08

# उत्सर्गपत्रम्

अशेषगुण-मण्डित-महनीय-कीर्ति

## श्रील-श्रीयुक्त-इन्दोरराज प्रधानमहिषी चन्द्रावती वाई

*महोदया-सुपवित्र-करकमलेषु*

*साक्षात् त्वंकमलेव देवि जयतादिन्दोर-सिंहासने,*
*पत्युःपार्श्वगता हरेरिव महाराजस्य सौभाग्यतः ।*
*विन्यस्ता विनयेन मे कृतिरियं मातः पुरस्तेऽधुना,*
*धन्योऽहं भाविता यदीह कृपया दृष्टिः पवित्रा पतेत् ॥*

On the throne of Indore, seated beside the Maharaja your revered consort, and attended by good fortune, Your Highness shines verily like Lakshmi by the side of the great Narayana. This work of mine, I, in all humility, lay before your sacred presence. O Mother, I shall deem myself fortunate if, through kindness, your holy glance lights on it.

KALANIDHI
Rare Book Collection
ACC No.: R-326
IGNCA Date: 25-3-08

# उपक्रमणिका

प्रसूतितन्त्रं नाम पुस्तकमिदं कतिपय-चिकित्सकसुहृदामनुरोधात् समयोपयोगितानुसरणाच्च मया प्रकटिमभूत्। सत्यापि विश्रुतसूश्रुतादितन्त्रे नातिकृतविद्यानामल्पानुसन्धानाञ्च छात्राणां प्रसूतिशारीरविज्ञानाय पुस्तकमिदं साहाय्यकृद्भवितेति कृतावत्र प्रयासः स्वीकृतः। नजाने पुनः स व्यर्थः सदर्थो वा जात इति।

किञ्च सम्प्रति वैद्यकशास्त्रानुशीलनरीतेर्यादृक् परिवर्त्तनं सम्वृत्तं तदालोच्य मनीषिणः वैद्यककृतश्रमाः वैद्याः प्रायेण विभिन्नविषयमवलम्ब्य पृथक् पृथक् ग्रन्थस्य आवश्यकतामनुभवन्ति तथा पुरेव न खल्विदानीं पाठार्थिनः कस्यापितन्त्रस्य समग्रमध्येतुमुत्सहन्ते अतो विषय-विशेषे ते सर्वथानभिज्ञाः न स्युरित्यपि विचिन्त्य संक्षेपेण पुस्तकमेतद् विविधवैद्यकशास्त्रेभ्यः संगृह्य प्रकाशितं। क्रमेणानेन आयुर्वेदाङ्गं सर्वमेव संक्षेपतः पृथक्तया प्रकाशयितुं अभिलषामि निवेदनमिति।

*श्री यामिनीभूषण राय कविरत्नस्य*

# FOREWARD.

A reprint of Prasutitantra a treatise in plain lucid Sanskrit on Midwifery, by my late revered father Kaviraj Jamini Bhushan Ray, M. A., M. B., M. R. A. S. (Lond), F. C. U., F. B. H. U., was long over due. The Present demand of the book by the students of Ayurveda, particularly with the opening of Ayurvedic Colleges in different provinces, is so great that this edition had to be hurried through the press, though a revised edition in accordance with the recommendations of Col. Sir R. N. Chopra in his report on enquiry of the Indigenous System of Medicine ("Fusion of the three systems of medicine"), was in view.

Indira Gandhi National Centre for the Arts

With the progress of our own National Government, if the Ayurvedic system of medicine of which the system of medicine and surgery in vogue to-day is born, once again comes in the curriculum and purview of the study of medicine in the Indian Universities the need of a compilation like this with a comparative study of the present day knowledge of the art of obstetrics stands beyond any question.

We hope to meet this end in the nearest future and will deem our endeavours amply rewarded, if the students and practitioners of Ayurveda welcome this reprint.

*Amar Bhushan Ray*

# INTRODUCTION

To write a book on ayurvedic obstetrics is extremely difficult for a pure ayurvedist, as a pure ayurvedist has long forgotten the practical application of this art as well as the general operative surgery which is also a part and parcel of the theory and practice of obstetrics. Kj. Jamini Bhusan Ray has not only been an erudite practicing ayurvedist, yet being a graduate of modern medical science has been the best equipped person to undertake successfully this very important and otherwise extremely difficult task.

In Kj. Jamini Bhusan, we find not only a harmonious blend of the East and the West, but also a combination of scholarship and organisation. He, being an M. A. and also M. B. of the Calcutta University was well versed in the Sanskrit language as well as the art and science o modern midwifery, besides he had been the greatest ayurvedic practitioner of his age. He was not only a successful practitioner, he has left a distinct mark in scholarship, being the author of a series of ayurvedic text books, of which the present book is one. These books are all written in easy Sanskrit, with the original text of the sages, making them most suitable for the students and practitioners.

Kj. Jamini Bhusan not only acquired the blessings of Goddess of Learning himself, he has also been the pioneer in propagating the learning of the ayurvedic

Indira Gandhi National Centre for the Arts

science by founding in 1916 the first modern ayurvedic institution in Bengal, if not, in the whole of India. This institution has since been appropriately called "Jamini Bhusan Astanga Ayurveda Vidyalaya." and the foundation stone laid by the most appropriate apostle, Mahatma Gandhi, in 1925.

Prasutitantram, the science and practice of ayurvedic midwifery, has already been a very vast subject at the hands of Susruta (C. 2100 B. C.) and a study of History of Medicine proves that Susruta had been the greatest surgeon and obstetrician of all nations and of all ages till 1850 A. D. After that time, the surgery of Susruta has been surpassed only due to the discovery of general anaesthesia (Morton discovered ether in 1846 and chloroform by Simpson in 1847), and asepsis (Lister—1867). The discovery of haemostatic forceps and other technical appliances also played a great role in the unparelleled advancement of modern surgery.

While the *Science* of surgery and obstetrics of Susruta reigned supreme till only just 100 years from to-day, no one knows for how many centuries or even milleneum, the *Practice* of Susrutian obstetrics had been lost to oblivion. This vast knowledge of ayurvedic obstetrics exists to-day only in the pages of the Susruta Samhita and totally forgotten by the ayurvedic practitioners for ages. It is probably for this reason, that the learned author of this book thought fit to present to the students only the barest facts in course of some chapters.

I like to take this opportunity of paying my homage to Susruta, for the bold and practical way of his teaching

along with repeated warnings to the surgeons, by adding the following lines from Susruta to that already quoted by the present author of the book in page 39 (অথ স্ত্রিয়মাশ্বাস্য মণ্ডলাগ্রেণাঙ্গুলি শস্ত্রেণ······যত্নতঃ) in connection with the operative procedure for abnormal presentation of the fetus which could not be manipulated by hand. Here, Jamini Bhusan quotes Susruta—during operative removal of the fetus, first pacify the patient, then perforate the skull of the fetus by *mandalagra* or finger knife and remove the bones of the skull. Then, by means of *garbha-sanku* instrument, fixing the skull or armpit, the fetus is to be removed. If the head is not crushed, remove by holding the orbit or neck. If the fetus obstructs at the shoulders, then it should be removed by amputating the limbs at the shoulder or cutting the clavicles. If abdomen appears distended, then open the abdomen, remove the distended viscera and then remove the nondistended fetus. If the fetus is obstructed at the hip, cut the bones before removal. Amputate those parts of the fetus, causing obstruction, before its removal and make all attempts to save the mother. ( S. Chikit. 15.7-8 ).

To this I like to add two other passages, just preceeding and following the above passages of Susruta. This gives us a bold assertion with adequate warning of the dangers, if mishandled. These run as follows.

सचेतनं च शस्त्रेण न कथञ्चन दारयेत् ।
दार्यमाणो हि जननीमात्मानं चैव घातयेत् ॥
अविषह्ये विकारे तु श्रेयोगर्भस्य पातनम् ।
न गर्भिण्या विपर्यासस्तस्मात्प्राप्तं न हापयेत् ॥

—सु० चि० अ० १५, १०-११

गर्भस्यगतयश्चित्रा जायन्तेऽनिलकोपतः ।
तत्रानल्पमतिर्वैद्यो वर्तेत विधिपूर्वकम् ॥
नोपेक्षेत मृतं गर्भं मूहूर्तमपि पण्डितः ।
स ह्याशु जननीं हन्ति निरुच्छ्वासं पशुं यथा ॥
मण्डलाग्रेण कर्त्तव्यं छेद्यमन्तर्विजानता ।
वृद्धिपत्रं हि तीक्ष्णाग्रं नारीं हिंस्यात् कदाचन ॥

—सु० चि० अ० १५, १४-१६

Never injure with sharp instruments the fetus that is living, because an injured fetus kills the mother and itself is also destroyed. ( S. Ch. 15/6 ). Due to aggravation of *vayu*, the fetus shows various forms of position. Hence an intelligent surgeon must do the proper thing most judiciously. A surgeon learned in the science of abnormal presentation of the fetus, must not hesitate for a moment to remove the dead fetus. If not done in time, the dead fetus kills the mother by suffocation like a beast. So, the skilled surgeon must remove the dead fetus by means of *mandalagra* knife. If required, remove it by removing the abdominal organs evisceration ). A scalpel, being a sharp pointed instrument, may also injure the mother, so, it must be used very carefully. ( S. Ch. 15/9-10 ). Here, we find mention of many modern embryotomic operations, viz. ,craneotomy, decapitation, cleidotomy, evisceration etc. These passages also give adequate note of warning to prevent injudicious use.

Dhirendra Nath Banerjee.
*Professor of Pathology,*
R. G. Kar Medical College, Calcutta.

# विषय-सूची


उत्सर्गपत्रम्

उपक्रमणिका

Foreward

Introduction

**प्रथमोऽध्यायः—**

आर्त्तवाधारतया गर्भाशयस्यादौ तदंगं योनिं विवृणोति— .... १

स्त्रीणां मेढ्रमुष्काभावात् तदाश्रितानां पेशीनामन्यत्रावस्थानं दर्शयति

गर्भाशयस्य स्थितिं स्वरूपंचाह ... ... १

आर्त्तवमाह ... ... २

तस्यार्त्तवस्य उपधातुत्वेऽपि गर्भहेतुतया प्राधान्यादुत्पादमाह ... २

कर्मवशात् कालविशेषे तस्याविर्भावतिरोभावौ दर्शयति ... ... २

धातुशोणितादार्त्तवस्य विशेषमाह ... ... २

अस्यैवाग्नेयतावगमे हेतुमाह अग्नीति ... ... २

शुक्रार्त्तव लक्षणमाह .... ... २

कृत्रिमाकृत्रिमभेदेनार्त्तवस्य द्वैविध्यमाह ... ... २

शुक्रोत्पत्तिमुक्त्वा सर्वाङ्गव्यापिनोऽपि तस्य विशिष्टं स्थानं दर्शयति ... ३

शुद्ध शुक्र लक्षणमाह .... ... ४

वातादिदुष्ट शुक्र लक्षणमाह ... ... ४

दुष्टशुक्रलक्षण दुष्टार्त्तवाप्यतिदिशन्नाह ... ... ४


Indira Gandhi National Centre for the Arts

आर्त्तवगुणेन शुक्रगुणाभिभवं दृष्टान्तेन दर्शयति ... ... ४

शुक्रप्रादुर्भाव कालमाह ... ... ४

## द्वितीयोऽध्यायः—

आदौ उद्वाहकालं उद्वाह योग्यां कन्यांचाह ... ... ५

स्त्री-पुंसोर्गर्भाधान योग्यं वयोदर्शयति ... ... ५

गर्भाधान योग्यं पुरुषं स्त्रियंचाह ... ... ५

मैथुनयोग्यां स्त्रियंचाह ... ... ५

मैथुनायोग्यं कालमाह ... ... ६

मैथुनायोग्यं पुरुषं मैथुनविधिंचाह ... ... ६

ऋतु विशेषे मैथुनं नियमति ... ... ६

मैथुनान्तरकरणीयमाह ... ... ६

तदकरणे दोषमाह ... ... ६

अतिमैथुनस्य दोषमाह .... ... ७

अति बालवृद्धयोर्मैथुनं निषेधयति ... ... ८

गर्भाधान योग्यंकालमाह ... ... ७

अदृष्टार्त्तवाया लक्षणमाह ... ... ७

ऋतौपुत्रीयमाचारं निर्दिशन्नाह .. ... ८

गर्भाधान दिवसेदम्पत्योराहार विशेषमाह .... ... ९

पुत्रकामस्य गर्भाधानकालमाह ... ... ९

त्र्यहंचभर्तुः संरक्षेदितियदुक्तं तदकरणे दोषमाह ... ... ९

गुणवत्पुत्रलाभार्थं विशिष्टं गर्भाधानमाह ... ... १०

Indira Gandhi National
Centre for the Arts

विशिष्ट पुत्रलाभार्थं गर्भाधानविशेषमाह ... .... १०
युग्मायुग्मासु रात्रिषु क्रमात् पुत्र-कन्या जननंसोपपत्तिकमाह ... ११

## तृतीयोऽध्यायः—

शुक्रार्त्तवयोः स्वरूपमुक्त्वा तदारब्धस्य पांचभौतिकत्वमाह ... १२
गर्भावहरणमाह ... ... १२
सद्योगृहीतगर्भाया लिंगमाह ... ... १२
व्यक्तगर्भाया लिंगमाह ... ... १२
गर्भिण्या आर्त्तवादर्शने हेतुमाह ... ... १२
अदृष्टामर्त्तवं यत् करोति तदाह ... ... १३
गर्भलक्षणमाह ... ... १३
शरीर लक्षणमाह ... ... १३
गर्भस्यांगोत्पत्तौ शौनकादीनां मतमाह ... ... १३
गर्भस्य मासानुमासिकं परिपुष्टिमाह ... ... १४-१६
गर्भस्य मातृतन्त्रतामाह ... ... १६
गर्भिण्या आहार रस परिणति दर्शयति ... ... १७

## चतुर्थोऽध्यायः—

मात्रधीनत्व प्रतीत्यर्थं अंगानां मातृजत्वमाह ... ... १७
तत्कारणभूतोपयोगप्रतिषेधाभ्यां वृद्धिक्षयजनन ज्ञानार्थं
अंगानांभूत जन्यत्वमाह ... ... १७
पित्रधीनत्व प्रतीत्यर्थं अंगानां पितृजत्वमाह ... ... १८
गर्भस्यात्मजान्याह ... ... १८

Indira Gandhi National Centre for the Arts

गर्भस्य सात्म्यजान्याह .... .... १८

गर्भस्य रसजान्याह ... ... १९

गर्भस्य सत्त्वजान्याह ... ... १९

समुदायात्मकत्वं सोदाहरणमाह ... ... १९

गर्भस्य गौरत्वादीनां वर्णभेदानां हेतुमाह ... ... १९

यकृत्प्लीहफुप्फुसोण्डुकाणामुत्पत्तिः ... ... २०

अन्त्रगुदबस्तीनां ... ... २०

जिह्वायाः ... ... २०

पेशीनां ... ... २०

स्नायुशिरयोः ... ... २०

आशयानां ... ... २०

स्रोतसां ... ... २१

वृक्क हृदय वृषणादीनां ... ... २१

क्लोम्न उत्पत्तिः ... ... २१

तत्र स्वभाव हेतुतांदर्शयति ... .... २१

तत्रापिधर्माधर्म निमित्ततामाह ... ... २१

गर्भाशये गर्भावस्थितिं दर्शयति ... ... २१


## पञ्चमोऽध्याय :—


गर्भिण्या आहारमाह ... ... २२

गर्भिण्या वर्जनीयमाह ... ... २२

दौहृदमाह ... ... २३

दौहृदविशेषात् कुमारस्वभावं निरूपयति ... ... २३

मासानुमासिकं गर्भोपचरणीयमाह ... ... २४

## षष्ठोऽध्यायः—

यदि बीजानुरूपं गर्भस्य पुंस्त्वं स्त्रीत्वं वा तर्हि व्यर्थं पुंसवनमित्याशंक्याह २५

पुंसवनकृत्यमाह ... ... २५

## सप्तमोऽध्यायः—

आदौगर्भस्रावरूपां व्यापत्तिमाह ... ... २६

दृष्टेऽपिपुष्पे यदागर्भःस्थास्यतितदाह ... ... २६

गर्भस्थापनविधिमाह ... ... २७

पतिते तु गर्भे यत्करणीयं तदाह ... ... २७

आमगर्भेत्वसम्यङ् निःसृते गर्भाशयात् तत्प्रतीकारमाह ... २७

गुल्मरूपां व्यापत्तिं तच्चिकित्सामाह ... ... २८

वातोदराणां व्यापत्तिं तच्चिकित्सामाह ... ... २८

तस्यैवावस्थान्तरमाह ... ... २८

अपरांव्यापत्तिमाह ... ... २८

उपविष्टकाख्यां व्यापत्तिमाह ... ... २८

उपशुष्काख्यां व्यापत्तिमाह ... ... २९

दोषभेदेनोपविष्टकोपशुष्ककयोर्लक्षणमाह ... ... २९

उपविष्टकोपशुष्कयोश्चिकित्सामाह ... ... २९

लीनाख्यांव्यापत्तिमाह ... ... ३०

तच्चिकित्सामाह ... ... ३०

उदावर्त्तरूपां व्यापत्तिमाह ... ... ३२
वातकृतांगर्भव्यापत्तिमाह ... ... ३१
पित्तकृतां व्यापत्तिमाह ... ... ३१
श्लेष्मकृतांव्यापत्तिमाह ... ... ३१
गर्भिण्या आहार-विहार विशेषमाह गर्भस्यविकृति विशेषमाह ... ३१
गर्भस्याष्टानां विकृतीनां नामानि तद्धेतु जिज्ञासा च ... ... ३२
कस्माद्विरेना जायते ? ... ... ३२
कस्मात् पवनेन्द्रियो जायते ... ... ३२
कस्मात् संस्कारवाही जायते ... .... ३२
कस्मात् नर-नारी षण्डो जायते ... .... ३२
कथं वक्री जायते ... ... ३३
कथमीर्षाभिरतिजायते ... ... ३३
कथंवातिकषण्डो जायते ... ... ३३
नागोदराख्यां व्यापत्तिमाह ... ... ३३
अनुक्तान् व्यापत्तिमाह ... ... ३३

## अष्टमोऽध्यायः—

प्रसवकाल अवैकारिकमाह .... ... ३४
सूतिकागारं विवृणोति ... ... ३४
अग्रोपहरणीयान्याह ... .... ३४
सूतिकागार प्रवेशमाह ... ... ३५
आसन्न प्रसवायालक्षणमाह ... ... ३५

Indira Gandhi National Centre for the Arts

उपस्थित गर्भायाः परिचर्यामाह ... ... ३५

अपरापातनादिकमाह ... ... ३६

## नवमोऽध्यायः—

अन्तर्मृते शिशौ यल्लक्षणंदृश्यते तदाह ... ... ३७

मूढगर्भमाह ... ... ३७

मूढगर्भस्य गतिं संस्थानं चाह ... ... ३७

सूतिक्लेशान्मृतेमातरि-संगवशान्मृते वा मूढगर्भे यत् कर्तव्यं तदाह ... ३७

मूढगर्भस्य संगान्नुक्त्वा तत्प्रतीकारान्नाह ... ... ३८

शस्त्रकर्म कष्टतममिति दर्शयितुमाह ... ... ३८

हस्तेनाहरणमपि न सुकरमिति दर्शयन् कर्त्तव्यतामुपदिशति ... ३८

यथागर्भमाहर्त्तव्यं हस्तेन तदाह ... ... ३८

अष्टौसंगान्नुल्लिख्य तत्र षट्स्वाहरण-कौशलमुपदिशति ... ... ३८

आहर्त्तुमशक्यौ द्वौ संगावाह ... ... ३९

हस्ताहरणायोग्यस्य मूढगर्भस्याहरणार्थं शस्त्रकर्माह ... ३९

मृतेमातरि गर्भे च जीविते यत् कर्तव्यं तदुपदिशति ... ३९

## दशमोऽध्यायः —

गर्भ शल्य निर्हरणानन्तरं सूतिकोपचरणीयमाह ... ... ४१

## एकादशोऽध्यायः—

मक्कल्ल लक्षणं तत्प्रतीकारश्चाह ... ... ४२

सूतिका रोगलक्षणमाह ... ... ४२

Indira Gandhi National Centre for the Arts

# परिशिष्टम्

## प्रथमोऽध्यायः—


| | | | |
|---|---|---|---|
| असृग्दरं निदानमाह | ... | ... | ४३ |
| सामान्य लक्षणमाह | ... | ... | ४३ |
| आर्तवाति प्रवृत्तौ उपद्रवानाह | ... | ... | ४३ |
| संख्यामाह | ... | ... | ४३ |
| कफजस्य लक्षणमाह | ... | ... | ४४ |
| पित्तजस्य लक्षणमाह | ... | ... | ४४ |
| वातजस्य लक्षणमाह | ... | ... | ४४ |
| त्रिदोषजस्यासाध्ययत्वमाह | ... | .... | ४४ |
| असाध्य लक्षणमाह | ... | ... | ४४ |
| शुद्धार्त्तव लक्षणमाह | ... | ... | ४४ |


## द्वितीयोऽध्यायः—


| | | | |
|---|---|---|---|
| कन्दरोग निदानमाह | ... | ... | ४५ |
| वातजस्य लक्षणमाह | ... | ... | ४५ |
| पित्तजस्य लक्षणमाह | ... | ... | ४५ |
| कफजस्य लक्षणमाह | ... | ... | ४५ |
| सर्वात्मकस्य लक्षणमाह | ... | ... | ४५ |


## तृतीयोऽध्यायः—


| | | |
|---|---|---|
| योनि व्यापदां निदान पूर्विक सम्प्राप्तिमाह ( सुश्रुत ) | ... | ४६ |


Indira Gandhi National Centre for the Arts

वाग्भटस्त्वाह ... ... ४६
वातजांयोनिव्यापदमाह ( चरक ) ... ... ४६
वाग्भटस्त्वाह ... ... ४६
पित्तजां योनिव्यापदमाह—( चरक ) ... ... ४७
वाग्भटस्त्वाह ... ... ४७
कफजां योनिव्यापदमाह ( चरक ) ... ... ४७
सर्वजां योनिव्यापदमाह ( चरक ) ... ... ४७
रक्तजां व्यापदमाह ( चरक ) ... ... ४८
अरजस्कामाह ( चरक ) ... ... ४८
अचरणामाह ( चरक ) ... ... ४८
अतिचरणमाह ( चरक ) ... ... ४८
प्राक्चरणमाह ( चरक ) ... ... ४८
चरणाद्वयस्यलक्षणमाह ( सुश्रुत ) ... ... ४८
उपप्लुतामाह ( चरक ) ... ... ४९
परिप्लुतामाह ( चरक ) ... ... ४९
विप्लुतापरिप्लुतयोर्लक्षणमाह ( सुश्रुत ) ... ... ४९
उदावर्त्तिनीमाह ( चरक ) ... ... ४९
कर्णिनीलक्षणमाह ( चरक ) .... .... ५०
पुत्रघ्नीलक्षणमाह ( चरक ) ... ... ५०
अन्तर्मुखी लक्षणमाह ( चरक ) .... .... ५०
सूचीमुखी लक्षणमाह ( चरक ) . ... ५०
शुष्काख्यां योनिव्यापदमाह ( चरक ) ... ... ५०
तस्याएव लक्षणमाह ( वाग्भटः ) ... ... ५०
वामिनी लक्षणमाह ( चरक ) ... ... ५१
षण्डीलक्षण ( चरक ) .... ... ५१
सुश्रुतस्त्वाह .... ... ५१
महायोनिलक्षणमाह ( चरक ) .... ... ५१

## चतुर्थोऽध्यायः

गर्भस्थापन योगः ... ... ५२

अन्यच्च ... ... ५२
गर्भशूलहरान् योगानाह .... .... ५५
गर्भेशुष्केयत्कर्तव्यं तदाह ... ... ५६
गर्भपाते रक्त स्राव चिकित्सामाह ... ... ५६
गर्भविलास तैलम् ... ... ५६

**पञ्चमोऽध्यायः**

वज्रकाञ्जिकम् ... ... ५७
पञ्चजीरकगुड़म् ... ... ५७
लवंगादि चूर्णम् ... ... ५८
गर्भचिन्तामणि रस ... ... ५९

**षष्ठोऽध्यायः**

अशोकघृतम् ... ... ६०
पुष्यानुग चूर्णम् ... ... ६१
मुद्गाद्यं घृतम् ... ... ६२
शीतकल्याणकं घृतम् ... ... ६२
बृहच्छतावरी घृतम् ... ... ६२

Indira Gandhi National
Centre for the Arts

**सप्तमोऽध्यायः**

कन्दचिकित्सा ... ... ६३

**अष्टमोध्यायः**

अतिचरणादीनां चिकित्सा ... ... ६४
प्राक्चरणादीनां चिकित्सा ... ... ६४
कर्णिन्याश्चिकित्सा .... .... ६४
उपावृत्तायाश्चिकित्सा ... ... ६४
योनिस्रंसादीनां चिकित्सा ... ... ६४
वामिन्यां चिकित्सा ... ... ६५
महायोन्याश्चिकित्सा .... .... ६५
सामान्य चिकित्सा ... ... ६६
रक्तयोनिश्चिकित्सा ... ... ६६

# प्रसूतितन्त्रम्

## शुक्रार्त्तववर्णनीयोनाम प्रथमोऽध्यायः

*आर्त्तवाधारतया गर्भाशयस्यादौ तदङ्गं योनिं विवृणोति—*

शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा प्रकीर्त्तिता ।
तस्यास्तृतीयेत्वावर्त्ते गर्भशय्या प्रतिष्ठिता ॥

स्त्रीणान्तु अपत्यपथे चतस्रः पेश्यस्तासां प्रसृतेऽभ्यन्तरतो द्वे, मुखाश्रिते वाह्ये च प्रवृत्ते द्वे ; गर्भच्छिद्रसंश्रितास्तिस्रः, शुक्रार्त्तव-प्रवेशिन्यस्तिस्र एव[1] ।

*स्त्रीणां मेढ्रमुष्काभावात् तदाश्रितानां पेशीनामन्यत्रावस्थानं दर्शयति—*

पुंसां पेश्यः पुरस्ताद् या प्रोक्ता लक्षणमुष्कजाः ।
स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः ॥

*गर्भाशयस्य स्थितिं रूपञ्चाह—*

स्त्रीणान्तु वस्तिपार्श्वगतो गर्भाशयः ।
यथा रोहितमत्सस्य मुखं भवति रूपतः ।
ततसंस्थानां तथारूपां गर्भशय्यां विदुर्बुधाः ॥

---

१—दश योनौ । तासामभ्यन्तराश्रिते द्वे, मुखाश्रिते वृत्ते द्वे । तिस्रो-गर्भमार्गाश्रयाः यस्यां गर्भस्तिष्ठति । योनिस्तु शङ्खनाभ्याकृतिस्त्र्यावर्त्ता । तस्या स्तृतीये आवर्ते पित्त पक्वाशयान्तरे रोहितमत्स्यमुखाकारा गर्भशय्या । तस्यां शुक्रार्त्तवप्रवेशिन्यस्तिस्रः पेश्यः ।

*आर्त्तवमाह—*

रक्तमेव स्त्रीणां मासे मासे गर्भकोष्ठमनुप्राप्य त्र्यहं प्रवर्त्तमानं आर्त्तवमित्याहुः ।

भवति चात्र—

मासेनोपचितं रक्तं धमनीभ्यामृतौ पुनः ।
ईषत्कृष्णं विगन्धञ्च वायुर्योनिमुखान्नुदेत् ॥

*तस्यार्त्तवस्य उपधातुत्वेऽपि गर्भहेतुतया प्राधान्यादुत्पादमाह—*

रसादेव स्त्रिया रक्तं रजः संज्ञं प्रवर्त्तते ।

*कर्मवशात् कालविशेष तस्याविर्भावतिरोभावौ दर्शयति—*

तद्वर्षाद्द्वादशादूर्ध्वं यति पञ्चाशतः क्षयम् ।

*धातुशोणितादार्त्तवस्य विशेषमाह—*

Indira Gandhi National
Centre for the Arts

आर्त्तवं शोणितं त्वाग्नेयं

*अस्यैवाग्नेयतावगमे हेतुमाह अग्नीति—*

अग्नीषोमीयत्वाद्गर्भस्य ।

*शुक्रार्त्तवलक्षणमाह—*

आर्त्तवं पुनः शशरुधिरलाक्षारसोपमं धौतञ्चाविरज्यमानं शुद्धमाहुः ।

शशासृक्प्रतिमं यत्तु यद्वा लाक्षारसोपमम् ।
तदार्त्तवं प्रसंशन्ति यद्वासो न विरञ्जयेत् ॥

*कृत्रिमाकृत्रिमभेदेनार्त्तवस्य द्वैविध्यमाह—*

यथोक्तं पुराणं कृत्रिमं । नवं अकृत्रिमं गर्भकृच्च ।

*शुक्रोत्पत्तिमाह—*

तत्राहारस्य सम्यक्परिणतस्य क्रमान्मज्जानमनुप्राप्तस्य सारः शुक्र संज्ञां लभते।

*शुक्रोत्पत्तिमुक्त्वा सर्वाङ्गव्यापिनोऽपि तस्य विशिष्टं स्थानं दर्शयति—*

तत्तु क्षीर इव सर्पिरिक्षुरस इव गुडः शरीरे शुक्रधरांकलामाश्रित्य सर्वाङ्गव्यापितया स्थितम्, विशेषतश्च मज्जमुष्कस्थानेषु, हर्षोदीरितं तु संघट्टनेन हृदयावेशात् पिण्डीभूतमङ्गादङ्गात् प्रवर्त्तते। शुक्रधरा कला सर्वप्राणिनां सर्वशरीरव्यापिनी।

भवन्ति चात्र—

यथा पयसि सर्पिस्तु गुडश्चेक्षुरसे यथा।
शरीरेषु तथा शुक्रं नृणां विद्याद् भिषग्वरः॥
द्व्यङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधः।
मूत्रस्रोतःपथाच्छुक्रं पुरुषस्य प्रवर्त्तते॥
कृत्स्नदेहाश्रितं शुक्रं प्रसन्नमनसस्तथा।
स्त्रीषु व्यायच्छतश्चापि हर्षात् तत् सम्प्रवर्त्तते॥

*शुद्धशुक्रलक्षणमाह तदिति—*

तत् सौम्यं स्निग्धं गुरु शुक्लं मधुगन्धि मधुरं पिच्छिलं बहु बहुलं घृततैलक्षौद्रान्यतमवर्णं च शुक्रं गर्भाधानयोग्यं भवति।

भवति चात्र—

स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च।
शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभन्तथा॥

Indira Gandhi National Centre for the Arts

*वातादिदुष्टशुक्रलक्षणमाह—*

वात-पित्त-श्लेष्म-कुणपगन्धिग्रन्थिपूय-क्षीणमूत्रपुरीषरेतांसि त्व-बीजानि भवन्ति। तत्र तनु रुक्षं फेनिलमरुणवल्यं विच्छिन्नं सरुजं चिराच्च निषिच्यते वातेन। किञ्चित्पीतमपिच्छिलमानीलं वा दहदिव प्रवर्त्तते पित्तेन। मज्जोपसंसृष्टं प्रभूतं विवद्धं चाम्भसि च किञ्चिन्मज्जति श्लेष्मणा। कुणपगन्धि अनल्पं रक्तेन। ग्रन्थिभूतं वातश्लेष्मभ्यां। पूतिपूयनिभं पित्तश्लेष्मभ्याम्। क्षीणं वातपित्ताभ्याम्। मूत्रपुरीषगन्धि सन्निपातेन।

*दुष्टशुक्रलक्षण दुष्टार्त्तवेप्यतिदिशन्नाह—*

आर्त्तवमपि शुक्रवद्दोषैरुपसंसृष्टमबीजमेव। तस्य लिङ्गं नाम च पूर्ववत्।

*आर्त्तवगुणेन शुक्रगुणाभिभवं दृष्टान्तेन दर्शयति—*

यथा क्षीरं दध्नाभियुतमभिषवणाद्विहाय स्वभावमापद्यते दधिभावं, शुक्रं तद्वत्।

*शुक्रप्रादुर्भावकालमाह—*

यथा हि पुष्पमुकुलस्थो गन्धो न शक्यमिहास्तीति वक्तुं नैव नास्तीत्यथवास्ति सतां भवानामभिव्यक्तिरिति कृत्वा केवलं सौक्ष्म्यान्नाभिव्यज्यते। स एव गन्धो विवृतपत्रकेशरैः कालान्तरेण व्यक्तिं गच्छत्येवं बालानामपि वयः परिणामात् शुक्रप्रादुर्भावोभवति रोमराज्यादयश्च। नोनषोड़शातीतसप्तिवर्षस्य पुंसः शुक्रसेकादय उपलभ्यते।

**इति शुक्रार्त्तववर्णनीयोनाम प्रथमोध्यायः।**

---

# अथ गर्भाधानो नाम द्वितीयोऽध्यायः

*आदौ उद्वाहकालं उद्वाहयोग्यां कन्याञ्चाह—*

अथ खलु पुमानेकविंशतिवर्षः कन्यां अतुल्यगोत्रां अतुल्याभिजनां असञ्चारिरोगकुलप्रसूतां रूपशीललक्षण सम्पन्नां अन्यूनां अविनष्टदन्तौष्ठकर्णनखकेशस्तनीं मृदुं अरोगप्रकृतिं अहीनाधिकाङ्गीं द्वादशवर्षदेशीयां विधिनोद्वहेत्।

*स्त्रीपुंसोर्गर्भाधानयोग्यं वयो दर्शयति—*

तस्यां षोड़शवर्षायां पञ्चविंशतिवर्षः पुरुषः पुत्रार्थं प्रयतेत। तदा हि तौ प्राप्तवीर्यौ वीर्यान्वितमपत्यं जनयतः।

भवन्ति चात्र—

**उनषोड़शवर्षायामप्राप्तः पञ्चविंशतिम्।**
**यद्याधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते॥**
**जातो वा न चिरं जीवेज्जीवेद्वा दुर्बलेन्द्रियः।**
**तस्मादत्यन्तबालायां गर्भाधानं न कारयेत्॥**

*गर्भाधानायोग्यं पुरुषं स्त्रियञ्चाह—*

अतिवृद्धायां दीर्घरोगिण्यां अन्येन वा विकारेणोपसृष्टायां गर्भाधानं नैव कुर्वीत। पुरुषस्याप्येवंविधस्य त एव दोषाः सम्भवन्ति।

*मैथुनायोग्यां स्त्रियमाह—*

ग्राम्यधर्मप्रवृत्तौ तु रजःस्वलां अनिष्टाचारां अशस्तां अतिकृशां

गर्भिणीं सूतिकां अनुत्तानां विकृताङ्गीं गणिकां अप्रजसं दुष्टयोनिं अन्यस्त्रियं—

*मैथुनायोग्यं कालमाह—*

तथा गोसर्गे मध्यन्दिनेऽर्द्धरात्रे पर्वदिनेषु—

*मैथुनायोग्यं पुरुषं मैथुनविधिश्चाह—*

पिपासुरप्रणीतसंकल्पः अमुक्तमूत्रादिः व्यथितः अनशितोऽत्यशितो न गच्छेत्, मूर्द्धाभिघातं परिहरेत्, न च निषेकाभिमुखं शुक्रं धारयेत्। मनःशरीरस्थितिमात्रमेव सेवेत व्यवायं। न च तत्परः स्यात्।

*ऋतुविशेषे मैथुनं नियमाति—*

द्वय (त्र्य) हाद् वसन्तशरदोः पक्षाद् वृष्टिनिदाघयोः
सेवेत कामतः कामं हेमन्ते शिशिरे बली।

*मैथुनान्तरकरणीयमाह—*

स्नानाङ्गरागव्यजनेन्दुपाद-
मांसासवक्षीररसान् रसालाम्।
भक्ष्यान् सिताढ्यान् सलिलं सुशीतं
सेवेत निद्राञ्च रतान्ततान्तः॥

*तदकरणे दोषमाह—*

स्त्रीसंसर्गाद्धि सद्यः स्यात् क्लीवता बलिनामपि।
एवं त्वाप्याय्यते शीघ्रं तेषां शुक्रञ्च धाम च॥

दृष्ट्यायुरोजः शुक्राणां क्षयं मेढ्राश्रयान् गदान् ।
वायोः कोपमधर्मञ्च मूढः प्राप्नोत्यतोऽन्यथा ॥
उत्तानो वेगरोधी वा वृद्धिमेहाश्मशर्कराः ।
तिमिरादिगदोत्पत्तिं मूर्द्धाद्याहननाद् ध्रुवम् ॥

*अतिमैथुनस्य दोषमाह—*

श्रमक्लमोरुदौर्बल्य बलधात्विन्द्रियक्षयाः ।
अपर्वमरणं च स्याद् विशेषेणातिमैथुनात् ।

*अतिबालवृद्धयोर्मैथुनं निषेधयति—*

न चर्त्ते षोड़शाद्वर्षात् सप्ततेः परतो न च ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
अतिबालो ह्यसम्पूर्ण—सर्वधातुः स्त्रियं व्रजन् ।
उपतप्येत सहसा तड़ागमिव काजलम् ॥
शुष्कं रूक्षं यथा काष्ठं जन्तुजग्धं विजर्जरं ।
स्पृष्टमात्रं विशीर्य्येत तथा वृद्धः स्त्रियं व्रजन् ॥

*गर्भाधानयोग्यं कालमाह—ऋतुरिति—*

ऋतुस्तु दृष्टार्त्तवो द्वादशरात्रं भवति । षोड़शरात्रमित्यन्ये । शुद्धयोनिगर्भाशयार्त्तवाया मासमपितु केचित् । तद्वददृष्टार्त्तवाप्यस्तीत्यपरे ।

*अदृष्टार्त्तवाया लक्षणमाह—*

क्षामप्रसन्नवदनां स्फुरच्छ्रोणिपयोधराम् ।
स्रस्ताक्षिकुक्षिं पुंस्कामां विद्यादृतुमतीं स्त्रियम् ॥

पद्मं सङ्कोचमायाति दिनेतीते यथा तथा।
ऋतावतीते योनिः सा शुक्रं नातः प्रतीच्छति॥

गते पुराणे रजसि नवेचावस्थिते शुद्धस्नातां स्त्रियमव्यापन्नयोनि-शोणितगर्भाशयामृतुमतीमाचक्ष्महे[1]।

*ऋतौ पुत्रीयमाचारं निर्दिशन्नाह—*

शुद्धार्त्तवा ऋतौ प्रथमदिवसात् प्रभृति ब्रह्मचारिणी दिवास्वप्ना-ञ्जनाश्रुपात-स्नानानुलेपनाभ्यङ्ग-नखच्छेदन प्रधावनहसनकथनाति-शब्दश्रवणावलेखनानिलायासान् परिहरेत्। किं कारणं? दिवा स्वपन्त्याः स्वापशीलः, अञ्जनात् अन्धः, रोदनात् विकृतदृष्टिः, स्नानानुलेपनाद् दुःखशीलः, तैलाभ्यङ्गात् कुष्ठी नखापकर्त्तनात् कुनखी, प्रधावनात् चञ्चलः, हसनात् श्यावदन्तौष्ठतालुजिह्वः प्रलापी च, अतिकथनात् अतिशब्दश्रवणात् बधिरः, अवलेखनात् खलः, मारुतायाससेवनात् मत्तः, गर्भोभवतीत्येवमेतान् परिहरेत्। दर्भ-संस्तरशायिनीं करतलशरावपर्णान्यतमभोजिनीम् हविष्यं[2] त्र्यहञ्च भर्त्तुः संरक्षेत्। ततः शुद्धस्नातां चतुर्थेऽहनि अहतवाससमलङ्कृताम् कृतमङ्गल स्वस्तिवाचनां भर्त्तारं दर्शयेत्। तदा हि यादृशमेव पश्यति चिन्तयति वा तादृशं प्रसूत इति।

---

१—पुराण इति ऋतुकालातिक्रमसञ्चिते। नवेचावस्थित इति वचनेन नवेऽप्यनवस्थिते गर्भकारणत्वं नास्तीति दर्शयति। —चक्रपाणि

२—पर्णशरावकरतलान्यतमे च यावकं पयसा सिद्धमल्पं कर्शनार्थमश्नी-यादिति वागभटः।

भवन्ति चात्र—

पूर्वं पश्येदृतुस्नाता यादृशं नरमङ्गना ।
तादृशं जनयेत् पुत्रं भर्त्तारं दर्शयेदतः ॥
आहाराचार चेष्टाभिर्यादृशीभिः समन्वितौ ।
स्त्रीपुंसौ समुपेयातां तयोः पुत्रोऽपि तादृशः ॥
ततो विधानं पुत्रीयमुपाध्यायः समाचरेत् ।
कर्मान्ते च क्रमं ह्येन-मारभेत विचक्षणः ॥

*गर्भाधानादिवसे दम्पत्योराहारविशेषमाह—*

ततोऽपराह्णे पुमान् मासं ब्रह्मचारी सर्पिः-स्निग्धः सर्पिक्षीराभ्यां शाल्योदनं भुक्त्वा मासं ब्रह्मचारिणीं तैलस्निग्धां तैलमाषोत्तराहारां नारीमुपेयाद्रात्रौ सामादिभिर्विश्वास्य ।

Indira Gandhi National Centre for the Arts

*पुत्रकामस्य गर्भाधनाकालमाह—*

विकल्प्यैवञ्चतुर्थ्यां षष्ठ्यामष्टम्यां दशम्यां द्वादश्यां चोपेयादिति पुत्रकामः । उत्ताना बीजं गृह्णीयात् ।

एषूत्तरोत्तरं विद्यादायुरारोग्यमेव च ।
प्रजासौभाग्यमैश्वर्यं बलञ्च दिवसेषु वै ।

अतःपरं पञ्चम्यां सप्तम्यां नवम्यां एकादश्याञ्च स्त्रीकामः । अतःपरं तूत्तरोत्तरमेवायुरादीनां ह्रासः ।

*त्र्यहञ्च भर्तुः संरक्षेदिति यदुक्तं तदकरणे दोषमाह—*

तत्र प्रथम दिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसां भवति । यच्च तत्राधीयते गर्भः स प्रसवमानो विमुच्यते । द्वितीयेप्येवं

सूतिकागृहे वा। तृतीयेप्येवमसम्पूर्णाङ्गोऽल्पायुर्वा भवति। चतुर्थे तु सम्पूर्णाङ्गो दीर्घायुश्च भवति। न च प्रवर्त्तमाने रक्ते वीजं प्रविष्टं गुणकरं भवति, यथा नद्यां प्रति-स्रोतः प्लावि द्रव्यं प्रक्षिप्तं प्रति-निवर्त्तते नोर्द्ध्वं गच्छति तद्वदेव द्रष्टव्यम्। तस्मान्नियमवतीं त्रिरात्रं परिहरेत्।

*गुणवत्पुत्रलाभार्थं विशिष्टं गर्भाधानमाह—*

ततः स्नानात् पुनरपि गुणवत् पुत्रार्थी चतूरात्रमुपेक्षेत। पुष्पदर्शनात् सप्तरात्रम्। अथाष्टम्यां दशम्यां द्वादश्यां वा रात्रौ पुत्रकामः संविशेत्।

यादृशं च पुत्रमाशसीत तद्रूपवर्णचरितान् जनपदाननुचिन्तयेति स्त्री वाच्या। तज्जनपदाहारविहारोपचारपरिच्छदांश्चानुविदधीत।

Indira Gandhi National Centre for the Arts

*विशिष्टपुत्रलाभार्थं गर्भाधानविशेषमाह—*

सा चेदेवमाशसीत बृहन्तमवदातं हर्य्यक्षमोजस्विनं शुचिं सत्व-सम्पन्नं पुत्रमिच्छेयमिति। शुद्धस्नानात् प्रभृत्यस्यै मन्थमवदात-यवानां मधुसर्पिर्भ्यां संसृज्य श्वेताया गोः सरूपवत्सायाः पयसालोड्य राजते कांस्ये वा पात्रे काले-काले सप्ताहं सततं प्रयच्छेत्। पानाय प्रातश्च शालियवान्न विकारान् दधिमधुसर्पिर्भिः पयोभिर्वा संसृज्य भुञ्जीत। तथा सायमवदातशरणशयनासनयानवसनभूषणा च स्यात्। सायं प्रातश्च शश्वत् श्वेतं महान्तं वृषभमाजानेयं हरिचन्द-नाङ्गदं पश्येत्। सौम्याभिश्चैनां कथाभिर्मनोऽनुकूलाभिरु-पासीत। सौम्याकृतिवचनोपचार चेष्टांश्च स्त्रीपुरुषानितरानपि

चेन्द्रियार्थानवदातान् पश्येत्। सहचर्य्यश्चैनां प्रियहिताभ्यां सतत-मुपचरेयुः। तथा भर्त्ता न च मिश्रभावमापद्येयातां। इत्यनेन विधिना सप्तरात्रं स्थित्वा अष्टमेऽहन्याप्लुत्य सशिरस्का भर्त्रा सह अहतानि वस्त्राण्याच्छादयेदवदातानि। अवदातांश्च स्रजोभूषणानि बिभृयात्।

भवन्ति चात्र—

ध्रुवं चतुर्णां सान्निध्यात् गर्भः स्यात् विधिपूर्वकः।
ऋतुक्षेत्राम्बुबीजानां सामग्र्यादङ्कुरो यथा॥
एवंजाता रूपवन्तो महासत्त्वाश्चिरायुषः।
भवन्त्यृणस्य मोक्तारः सत्पुत्राः पुत्रिणे हिताः॥

Indira Gandhi National

*युग्मायुग्मासु रात्रिषु क्रमात् पुत्रकन्याजननं सोपपत्तिकमाह—*

तत्र युग्मासु रात्रिषु अल्पीभवत्यार्त्तवम्, अयुग्मासु अप्यायते। तस्मात्तासु क्रमात् पुत्रस्य दुहितुश्च जन्म। अतएव चानुपरतार्त्तव-दर्शनात् पुत्रार्थी विषमेष्वप्यहस्सु नोपेयात्। यदि त्वाहारानुरोधा-दयुग्मासु शुक्रस्याधिकता युग्मासु च न्यूनता स्यात् ततः पुमान् स्त्र्याकृतिर्दुर्बलो हीनाङ्गो वा जायते, स्त्री पुरुषाकृतिर्दुर्बला हीनाङ्गी वा।

इति गर्भाधानोनाम द्वितीयोऽध्यायः।

# अथ गर्भावक्रान्तिर्नाम तृतीयोऽध्यायः

*शुक्रार्त्तवयोः स्वरूपमुक्त्वा तदारब्धस्य गर्भस्य पाञ्चभौतिकत्वमाह—*

सौम्यं शुक्रं आर्त्तवमाग्नेयं इतरेषामप्यत्र भूतानां सान्निध्यमस्त्यणुना विशेषेण परस्परोपकारात् परस्परानुग्रहात् परस्परानुप्रवेशाच्च ।

*गर्भावतरणमाह—*

तत्र स्त्रीपुंसयोः संयोगे तेजः शरीराद् वायुरुदीरयति । ततस्तेजोऽनिलसन्निपाताच्छुक्रं च्युतं योनिमभिप्रतिपद्यते संसृज्यते चार्त्तवेन । ततोऽग्निसोमसंयोगात् संसृज्यमानोगर्भो गर्भाशयमनुप्रतिपद्यते ।

*सद्योगृहीतगर्भाया लिङ्गमाह—*

Indira Gandhi National Centre for the Arts

अथ नार्य्याः सद्योगृहीतगर्भायाश्च लिङ्गं योन्या बीजग्रहणं तृप्तिर्गरिमा स्फुरणं शुक्रार्त्तवयोस्त्वनुबन्धश्च । तथा प्रहर्षो हृल्लासस्तन्द्रा अङ्गसादः प्रसेकोहृदयव्यथा ग्लानिः पिपासा च ।

*व्यक्तगर्भाया लिङ्गमाह—*

क्रमेण तु व्यक्तगर्भायाः कुक्षिमात्रगौरवं क्षामनेत्रस्वरता अक्षिरोमसंलुननं निद्राजृम्भणं मूर्च्छा छर्दिररुचिः पादशोफोऽम्लेऽभिलाषस्तेषुतेषु चोच्चावचेषु भावेषु इति ।

*गर्भिण्या आर्त्तवादर्शने हेतुमाह—*

तस्याश्च रजोवाहिनां स्रोतसां वर्त्मानि उपरुध्यन्ते गर्भेण तस्मात् ततः परं आर्त्तवं न दृश्यते ।

*अदृष्टमार्त्तवं यत् करोति तदाह—*

ततस्तदधः प्रतिहतं अपरं अपरञ्चोपचीयमानं अपरेत्याहु जरायुरित्यन्ये। स्थिते तु रक्ते रोमराजी प्रादुर्भवति। जरायुशेषं चोर्द्ध्वमसृक् प्रतिपद्यते। तस्मात् पीनकपोलपयोधरता कृष्णौष्ठचुचूकत्वं च। स्तनाश्रयमेव कफोपचितं स्तन्यतामुपगतं। प्रसूतायाः पुनराहाररसेनाप्यायते।

*गर्भलक्षणमाह—*

शुक्रशोणितं गर्भाशयस्थं आत्मप्रकृतिविकार संमूर्च्छितं गर्भ इत्युच्यते।

*शरीरलक्षणमाह—*

तञ्च चेतनावस्थितं वायुर्विभजति, तेज एनं पचति, आपः क्लेदयन्ति। पृथिवी संहन्ति, आकाशं विवर्द्धयति। एवं विवर्द्धितः स यदा हस्तपादजिह्वाघ्राणकर्णनितम्बादिभिरङ्गैरुपेत स्तदा शरीरमिति संज्ञां लभते।

*गर्भस्याङ्गोत्पत्तौ शौनकादीनां मतमाह—*

गर्भस्य हि सम्भवतः पूर्वं शिरः सम्भवतीत्याह शौनकः शिरोमूलत्वाद्देहेन्द्रियाणाम्। हृदयमिति कृतवीर्यो बुद्धेर्मनसश्च स्थानत्वात। नाभिरिति पाराशर्य्यः, ततोहि वर्द्धते देहो देहिनः। पाणिपादमिति मार्कण्डेयः, तन्मूलत्वाच्चेष्टाया गर्भस्य। मध्यशरीरमिति सुभूति गौतमः, तन्निवद्धत्वात सर्व गात्र सम्भवस्य। तत्तु न सम्यक्। सर्वाङ्गप्रत्यङ्गानि युगपत्

सम्भवन्तीत्याह धन्वन्तरिः। गर्भस्य सूक्ष्मत्वात् नोपलभ्यन्ते वंशांकुरवत् चूतफलवच्च। तद्यथा चूतफले परिपक्वे केशर-मांसास्थिमज्जानः पृथक् दृश्यन्ते कालप्रकर्षात्। तान्येव तरुणे नोपलभ्यन्ते सूक्ष्मत्वात्। तेषां सूक्ष्माणांकेशरादीनां कालः प्रव्यक्ततां करोति। एतेनैव वंशाङ्कुरोऽपिव्याख्यातः। एवं गर्भस्य तारुण्ये सर्वेषु अङ्गप्रत्यङ्गेषु सत्स्वपि सौक्ष्म्यादनुपलब्धिः। तान्येव कालप्रकर्षा प्रव्यक्तानि भवन्ति।

गर्भस्य मासानुमासिकां परिपुष्टिमाह—

*प्रथमे मासि—*

कललं जायते। ( सु० )

कललं जायते। ( वृ० वा० ) संमूर्च्छितः सर्वधातुकलुषीकृतः खेटभूतो भवत्यव्यक्तविग्रहः स च सद्भूताङ्गावयवः।

*द्वितीये मासि—*

घनः पेश्यर्बुदं वा तेभ्यः क्रमात् पुंस्त्रीनपुंसकानि। ( वृ० वा० )

शीतोष्मानिलैरभिप्रपच्यमानानां महाभूतानां सङ्घातो घनः सञ्जायते। यदि पिण्डः पुमान्, स्त्रीचेत् पेशी, नपुंसकञ्चेत् अर्व्बुदमिति। ( सु० ) घनः सम्पद्यते पिण्डः पेश्यर्बुदं वा ; तत्र घनः पुरुषः, स्त्री पेशी, अर्बुदं नपुंसकम्। ( च० )

*तृतीये मासि—*

पञ्चधा प्ररोहति। तद्यथा सक्थिनी बाहू शिरश्च। सक्थ्यादिप्ररोहैककालमेव च सर्वाङ्गावयवेन्द्रियाणि युगपत् सम्भवन्ति

अन्यत्र जन्मोत्तरकालजेभ्योदन्तादिभ्यः। क्रमेण तु स्पष्टीभवन्ति। एषा प्रकृतिः। ( वृ० वा० )

हस्तपादशिरसां पञ्चपिण्डकाः निवर्त्तन्ते। अङ्गप्रत्यङ्गविभागश्च सूक्ष्मो भवति। ( सु० ) सर्वेन्द्रियाणि सर्वाङ्गावयवश्च यौगपद्येनाभि निर्वर्त्तन्ते। ( च० )

*चतुर्थे मासि—*

अङ्गप्रत्यङ्गप्रविभागः प्रव्यक्तो गर्भश्च स्थिरोभवति। ( वृ० वा० )

सर्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरो भवति। गर्भहृदयप्रव्यक्तभावात् चेतनाधातुरभिव्यक्तो भवति कस्मात् तत्स्थानत्वात्। तस्माद्गर्भश्चतुर्थेमास्यभिप्रायं करोति इन्द्रियार्थेषु। ( सु० ) स्थिरत्वमापद्यते गर्भः। तस्मात् तदा गर्भिणी गुरुगात्रत्वमधिक मापद्यते विशेषेण। ( च० )

Indira Gandhi National Centre for the Arts

SAN
618.20233
RAY

*पञ्चमे मासि—*

मनः प्रतिबुद्धतरं भवति, मांसशोणितोपचयश्च। ( वृ० वा० )

गर्भस्य मांसशोणितोपचयो भवत्यधिकमन्येभ्योमासेभ्यः। तस्मात् तदा गर्भिणी कार्श्यमापद्यते विशेषेण। ( च० )

*षष्ठे मासि—*

केशरोमनखास्थिस्नाय्वादीनि अभिव्यक्तानि, बलवर्णोपचयश्च। ( वृ० वा० )

बुद्धिः ( सु० )। गर्भस्य बलवर्णोपचयोभवत्यधिकमन्येभ्यो मासेभ्यः। तस्माद्गर्भिणी बलवर्णहानिमापद्यते विशेषेण। ( च० )

*सप्तमे मासि—*

सर्वाङ्गसम्पूर्णता। (वृ० वा०)

सर्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरः। (सु०)। गर्भः सर्वैर्भावैराप्यायते सहसा। (च०)

*अष्टमे मासि—*

गर्भश्च मातृतो गर्भतश्च माता रसहारिणीभिर्वाहिणीभि· र्मुहुर्मुहुरोजः परस्परं आददाते। एवं गर्भस्य जन्म व्यापत्तिमत्तदा भवति। ओजसोऽनवस्थितत्वात्। (वृ० वा०)

अस्थिरीभवत्योजः, तत्र जातश्चेन्न जीवेत्। (सु०)। गर्भश्च मातृतोगर्भतश्च माता रसहारिणीभिः संबाहिणीभिर्मुहुर्मुहुरोजः परस्परतः आददाते गर्भस्यासम्पूर्णत्वात्। तस्मात्तदा गर्भस्य जन्म व्यापत्तिमद् भवत्योजसोऽनवस्थितत्वात्। (च०)

*गर्भस्य मातृतन्त्रतामाह—*

तत्र स्थितश्च गर्भोमातरि स्वपन्त्यां स्वपिति प्रबुद्धायां प्रबुध्यते। परतन्त्रवृत्तेश्चगर्भस्य। निषेकात् प्रभृति गर्भाशयोपस्नेहोपस्वेदौवर्त्तनं ततो व्यक्तीभवत्यङ्गप्रत्यङ्गस्यास्य नाभ्यां प्रतिबद्धा नाड़ी नाड्यामपरा, तस्यां मातृहृदयं ततो मातृहृदयाहाररसो धमनीभिः स्पन्दमानोऽपरामुपैति। ततः क्रमान्नाभिस्ततश्च स पुनर्गर्भस्य पक्वाशये स्वकायाग्निना पच्यमानः प्रसादबाहुल्याद् धात्वादिपुष्टिकरः सम्पद्यते। तथा रोमकूपैरुपस्नेहोरस एव पयोभूतः।

*गर्भिण्या आहाररसपरिणतिं दर्शयति—*

स च सर्वरसवानाहारः स्त्रिया ह्यापन्नगर्भाया त्रिधा रसः प्रतिपद्यते स्वशरीरपुष्टये स्तन्याय गर्भवृद्धये च। अजातस्य साक्षादन्नपानानुप्रवेशात्। अम्लत्वाच्च रसस्य गर्भस्य स्थूलमलासम्भवः।

भवन्ति चात्र—

मलाल्पत्वादयोगाच्च वायोः पक्वाशयस्य च।
वातमूत्रपुरीषाणि न गर्भस्थः करोति हि॥
जरायुणा मुखेच्छन्ने कण्ठे च कफवेष्टिते।
वायोर्मार्गनिरोधाच्च न गर्भस्थः प्ररोदिति॥

इति गर्भावक्रान्तिर्नाम तृतीयोऽध्यायः।

Indira Gandhi National ... Arts

# अथ गर्भविवरणोनाम चतुर्थोऽध्यायः

*मात्रधीनत्वप्रतीत्यर्थं अङ्गानां मातृजत्वमाह—*

यानि खल्वस्य गर्भस्य मातृजानि यानि चास्य मातृतः सम्भवन्ति तान्यनुव्याख्यास्यामः—तद्यथा-त्वक् च लोहितञ्च मांसञ्च मेदश्च नाभिश्च हृदयश्च क्लोम च यकृच्च प्लीहा च वृक्कौ च वस्तिश्च पुरीषाधानञ्चामाशयश्च पक्वाशयश्चोत्तरगुदञ्चाधरगुदञ्च क्षुद्रान्त्रञ्च वपावहनञ्चेति मातृजानि।

*तत्कारणभूतोपयोगप्रतिषेधाभ्यां वृद्धिक्षयजननज्ञानार्थं अङ्गानां भूतजन्यत्वमाह—*

मातृजादयोऽप्यस्य महाभूतविकारा एव। तत्रास्याकाशात्मकं

शब्दःश्रोत्रं लाघवं सौक्ष्म्यं विवेकश्च। वाय्वात्मकं स्पर्शः स्पर्शनञ्च रौक्ष्यं प्रेरणम् धातुव्यूहनम् चेष्टाश्च शारीर्य्यः। अग्न्यात्मकं रूपं दर्शनं प्रकाशः पक्तिरौष्ण्यञ्च। अवात्मकं रसनं शैत्यं मार्द्दवं स्नेहः क्लेदश्च। पृथिव्यात्मकं गन्धो घ्राणं गौरवं स्थैर्य्यं मूर्त्तिश्च। एवमयं लोकसम्मितः पुरुषः।

*पित्रधीनत्वप्रतीत्यर्थं अङ्गानां पितृजत्वमाह—*

यानि खल्वस्य गर्भस्य पितृजानि यानि चास्य पितृतः सम्भवतः सम्भवन्ति तान्यनुव्याख्यास्यामः। तद्यथा—केशश्मश्रुनखलोम-दन्तास्थिसिरास्नायुधमन्यः शुक्रमिति पितृजानि।

*गर्भस्यात्मजान्याह—*

यानि खल्वस्य गर्भस्य आत्मजानि यानि अस्य आत्मतः सम्भवतः सम्भवन्ति तान्यनुव्याख्यास्यामः। तद्यथा—तासु तासु योनिषु उत्पत्तिः, आयुः आत्मज्ञानं, मनः, इन्द्रियाणि, प्राणापानौ, प्रेरणं, धारणं, आकृतिः स्वरवर्णविशेषाः सुखदुःखेच्छाद्वेषौ चेतना धृतिर्बुद्धिःस्मृतिरहङ्कार यत्नश्चेत्यात्मजानि।

*गर्भस्य सात्म्यजान्याह—*

यानि खल्वस्य गर्भस्य सात्म्यजानि यान्यस्य सात्म्यतः सम्भवतः सम्भवन्ति तान्यनुव्याख्यास्यामः। तद्यथा आरोग्यमनालस्य-मलोलुपत्वं इन्द्रियप्रसादः स्वरवर्णबीजसम्पत् प्रहर्षभूयस्त्वञ्चेति सात्म्यजानि।

*गर्भस्य रसजान्याह—*

यानि खल्वस्य गर्भस्य रसजानि यानि चास्य रसतः सम्भवतः सम्भवन्ति तान्यनुव्याख्यास्यामः। तद्यथा शरीरस्याभिनिर्वृत्ति रभिवृद्धिः प्राणानुबन्धः, तृप्तिः पुष्टिरुत्साहश्चेति रसजानि।

*गर्भस्य सत्त्वजान्याह—*

यानि खल्वस्य गर्भस्य सत्त्वजानि यान्यस्य सत्त्वतः सम्भवतः सम्भवन्ति तान्यनुव्याख्यास्यामः। तद्यथा—भक्तिः, शीलं, शौचं, द्वेषः, स्मृतिः, मोहः, त्यागः, मात्सर्य्यं, शौर्य्यं, भयं, क्रोधः, तन्द्रा, उत्साहः, तैक्ष्ण्यं, मार्दवं, गाम्भीर्य्यं, अनवस्थितत्वं इत्येवमादयश्चान्ये।

*समुदयात्मकत्वं सोदाहरणमाह—*

Indira Gandhi National Centre for the Arts

एवमयं नानाविधानामेषां गर्भकराणां भावानां समुदयादभिनिर्वर्त्तते गर्भः, यथा कूटागारं नानाद्रव्यसमुदायाद् यथा रथो नानारथाङ्गसमुदायात् तस्मादेतदवोचामः मातृजश्चायं गर्भः पितृजश्चात्मजश्चसात्म्यजश्चरसजश्च। अस्ति च सत्वमुपपादकमिति।

*गर्भस्य गौरत्वादीनां वर्णभेदानां हेतुमाह—*

•तत्र शुक्रे शुक्ले घृतमण्डाभे वा गर्भस्य गौरत्वं, तैलाभे कृष्णत्वं मध्वाभे श्यामत्वं। तथा क्षीरादिमधुराणां उपयोगात् मातुरुदकविहाराच्च गौरता। तिलान्नविदाहिना कृष्णता। व्यामिश्रानां श्यामता। देशकालानुवृत्तितश्च वर्णभेदः। तथा तेजोधातोरुद-

काकाशधातुसम्पर्काद् गौरता। भूवायुसम्पर्कात् कृष्णता। सर्वधातु-साम्ये श्यामता।

गर्भस्य कोष्ठाङ्गानामुत्पत्तिमाह—

*तत्र यकृत्प्लीहफुफ्फुसोण्डुकाणां*—

गर्भस्य यकृत्प्लीहानौ शोणितजौ। शोणितफेनप्रभवः फुप्फुसः शोणितकिट्टप्रभव उण्डुकः।

*अन्त्रगुदवस्तीनां*—

असृजः श्लेष्मणश्चापि यः प्रसादः परोमतः।
तं पच्यमानं पित्तेन वायुश्चाप्यनुधावति॥
ततोऽस्यान्त्राणि जायन्ते गुदं वस्तिश्चदेहिनः।

*जिह्वायाः*—

Indira Gandhi National
Centre for the Arts

उदरे पच्यमानानामाध्मानाद् रुक्मसारवत्।
कफशोणितमांसानां सारो जिह्वा प्रजायते॥

*पेशीनां*—

यथार्थमुष्मणा युक्तो वायुः स्रोतांसि दारयेत्।
अनुप्रविश्य पिशितं पेशीर्विभजते तथा॥

*स्नायुसिरयोः*—

मेदसः स्नेहमादाय सिरा स्नायुत्वमाप्नुयात्।
सिराणाञ्च मृदुः पाकः स्नायूनाञ्च ततः खरः॥

*आशयानां*—

आशय्याभ्यासयोगेन करोत्याशयसम्भवम्।

*स्रोतसां—*

ऊष्मणा सहितश्चापि दारयत्यस्य मारुतः।
ऊद्ध्र्वं तिर्य्यगधःस्ताच्च स्रोतांस्यपि यथातथा॥

*वृक्कहृदयवृषणादीनां—*

रक्तमेदःप्रसादद् वृक्कौ। मांसासृक्कफमेदःप्रसादात् वृषणौ। शोणितकफप्रसादजं हृदयं। शुक्रशोणितस्याभिपच्यमानस्य तत्र क्षीरस्येव सन्तानिका सप्त त्वचो भवन्ति।

*क्लोम्न उत्पत्तिमाह—*

समानवायुप्रध्माताद्रक्ताद्देहोष्मपाचितात्।
किञ्चिदुच्छ्रितरूपस्तु जायते क्लोमसंज्ञितः॥

*तत्र स्वभावहेतुतां दर्शयति—*

सन्निवेशः शरीराणां दन्तानां पतनोद्भवौ।
तलेष्वसम्भवो यश्च रोम्णामेतत् स्वभावतः॥
अङ्गप्रत्यङ्गनिर्वृत्तिः स्वभावादेव जायते।

*तत्रापि धर्माधर्मनिमित्ततामाह—*

अङ्गप्रत्यङ्गनिर्वृत्तौ ये भवन्ति गुणागुणाः।
ते ते गर्भस्य विज्ञेया धर्माधर्मनिमित्तजाः॥

*गर्भाशये गर्भावस्थितिं दर्शयति—*

गर्भस्तु खलु मातुः पृष्ठाभिमुख ऊर्ध्वशिराः ललाटे कृताञ्जलिः सङ्कुच्य अङ्गानि आस्ते जरायुवृतः कुक्षौ।

इति गर्भविवरणोनाम चतुर्थोऽध्यायः।

---

# अथ गर्भोपचरणीयोनाम पञ्चमोऽध्यायः

*गर्भिण्या आहारमाह—*

हृद्यं द्रवं मधुरप्रायं स्निग्धं दीपनीयसंस्कृतञ्च भोजनं भोजयेत्। सामान्यत एतदाप्रसवात्। विशेषस्तु गर्भिणी प्रथम-द्वितीय-तृतीय-मासेषु मधुरशीतद्रवप्रायमाहारमुपसेवेत। विशेषस्तु तृतीये षष्ठि-कौदनं पयसा भोजयेत् चतुर्थे दध्ना, पञ्चमे पयसा, षष्ठे सर्पिषा।

*गर्भिण्या वर्जनीयमाह—*

गर्भिणी प्रथमदिवसात् प्रभृति नित्यं प्रहृष्टा शुच्यलंकृता शुक्लवसना शान्तिमङ्गलदेवताब्राह्मणगुरुपरा च भवेत्। मलिन-विकृतहीनगात्राणि न स्पृशेत्। दुर्गन्धदुर्दर्शनानि परिहरेत् उद्वेज-नीयाश्च कथाः। शुष्कं पर्य्युषितं क्वथितं क्लिन्नं चान्नं नोपभुञ्जीत। वहिर्निष्क्रमणं शून्यागारचैत्यश्मशानवृक्षश्रयान् क्रोधभयसङ्करांश्च भावानुच्चैर्भाष्यादिकं परिहरेत्, यानि च गर्भं व्यापादयन्ति। नचाभीक्ष्णं तैलाभ्यङ्गोत्सादनादीनि निषेवेत। नचायासयेच्छरीरं पूर्व्वोक्तानि च परिहरेत्। शयनासनं मृद्वास्तरणं नात्युच्चमपाश्रमो-पेतमसम्बाधं विदध्यात्।

तदा प्रभृत्येव व्यायामं व्यवायं अप्रियावलोकश्रवणं अतिकर्षणं दिवास्वप्नं रात्रिजागरणं शोकं अतिमात्रसंक्षोभियानयानं भयं उत्कटविषमकठिनासनं, आतपाग्निसेवां, चैकान्ततः स्नेहादिक्रियां शोणितमोक्षणञ्चाकाले वेगविधारणञ्च न सेवेत।

भवन्ति चात्र—

अतिव्यवायमायासं भारं प्रावरणं गुरु।
अकालजागरस्वप्न कठिनोत्कटकासनम्॥
शोकक्रोधभयोद्वेग वेगश्रद्धाविधारणम्।
उपवासाध्वतीक्ष्णोष्ण गुरुविष्टम्भि भोजनम्॥
रक्तं निवसनं श्वभ्रकूपेक्षां मद्यमामिषम्।
उत्तानशयनं यच्च स्त्रियो नेच्छन्ति तत् त्यजेत्॥
दोषाभिघातैर्गर्भिण्या यो यो भागः प्रपीड्यते।
स स भागः शिशोस्तस्य गर्भस्थस्य प्रपीड्यते॥

गर्भसमानयोगक्षेमा हि गर्भिणी भवति। तस्मात् विशेषस्तां प्रियहिताभ्यां गर्भोपघातकरेभ्यो रक्षेत्। यथा यथा च गर्भोवृद्धिमाप्नोति तथा तथा भाराहाररसापचाराच्च स्त्रिया बलक्षयः।

Indira Gandhi National Centre for the Arts

*दौहृदमाह—*

गर्भश्चतुर्थेमासि अभिप्रायं इन्द्रियार्थेषु करोति। द्विहृदयाञ्च-नारीं दौहृदिनीमाचक्षते। दौहृदविमाननात् कुब्जं कुणिं खञ्जं जड़ं वामनं विकृताक्षं अनक्षं नारी सुतं जनयति। तस्मात् सा यद् यद् इच्छेत् तत् तत् तस्यै दापयेत्। लब्धदौहृदा हि वीर्यवन्तं चिरायुषञ्च पुत्रं जनयति।

*दौहृदविशेषात् कुमारस्वभावं निरूपयति—*

राजसन्दर्शने, यस्या दौहृदं जायते स्त्रियाः।
अर्थवन्तं महाभागं कुमारं सा प्रसूयते॥
दुकूलपट्टकौशेयभूषणादिषु दौहृदात्।
अलङ्कारैषिणं पुत्रं ललितं सा प्रसूयते॥

आश्रमे संयतात्माना धर्मशीलं प्रसूयते।
देवताप्रतिमायान्तु प्रसूते पार्षदोपमम्॥
दर्शने व्यालजातीनां हिंसाशीलं प्रसूयते।

*मासानुमासिकं गर्भोपचरणीयमाह—*

अतःपरं निर्विकारमाप्यायमानस्य गर्भस्य मासे मासे कर्मोपदेक्ष्यामः। प्रथमे मासे शंकिता चेद्गर्भमापन्ना क्षीरमनुपस्कृतं मात्रावच्छीतं काले पिवेत् सात्म्यञ्च भोजनं सायं-प्रातश्च भुञ्जीत। द्वितीये मासे क्षीरमेव मधुरौषधसिद्धं। तृतीये मासे क्षीरं मधुसर्पिर्भ्यां उपसंसृज्य। चतुर्थे मासे क्षीरनवनीतमक्षमात्रमश्नीयात्। पञ्चमे मासे क्षीरसर्पिः। षष्ठे मासे क्षीरसर्पिर्मधुरौषध सिद्धं। तदेव सप्तमे मासे। अष्टमे तु मासे क्षीरयवागूं सर्पिष्मतीं काले काले पिवेत्। नवमे तु खल्वेनां मासे मधुरौषधसिद्धेन तैलेनानुवासयेत्।

अतश्चास्या तैलं पिचुमिश्रं योनौ प्रनयेद् गर्भस्थानमार्गस्नेहार्थम्। यदिदं कर्मप्रथममासमुपादायोपदिष्टं आनवमान्मासात्। तेन गर्भिण्या गर्भसमये गर्भधारणे कुक्षिकटीपार्श्वपृष्ठं मृदु भवति वातश्चानुलोमः सम्पद्यते मूत्रपुरीषे च प्रकृतिभूते सुखेन मार्गमनुपद्येते। पुत्रं सम्पदुपेतं सुखिनं सुखेनैषा कालेन प्रसूते।

इति गर्भोपचरणीयोनाम पञ्चमोऽध्यायः

SANS
618.20233
RAY

# पुंसवनंनाम षष्ठोऽध्यायः

एवमेभिनिर्वर्त्तमानस्य तु स्त्रीपुरुषत्वे हेतुः पूर्वमुक्तः। यथा हि बीजमनुपतप्तं उपतप्तं स्वां स्वां प्रकृतिमनुविधीयते व्रीहिर्वा व्रीहित्वं यवो वा यवत्वं तथा स्त्रीपुरुषावपि यथोक्तं हेतुविभागमनुविधीयते।

*यदि बीजानुरूपं गर्भस्य पुंस्त्वं स्त्रीत्वं वा तर्हि व्यर्थं पुंसवनमित्याशङ्क्याह—*

तयोः कर्मणा वेदोक्तेन विवर्त्तनमुपदिश्यते प्राक् व्यक्तीभावात्। प्रयुक्तेन सम्यक् कर्मणां हि देशकालसम्पदुपेतानां नियतमिष्टफलत्वं तथेतरेषामितरत्वं। तस्मादापन्नगर्भां स्त्रियमभिसमीक्ष्य प्राक् व्यक्तीभावाद्गर्भस्य पुंसवनमस्यै दद्यात्[1]।

*पुंसवनकृत्यमाह—*

गोष्ठेजातस्य न्यग्रोधस्य प्रागुत्तराभ्यां शाखाभ्यां शुङ्गे अनुपहते आदाय द्वाभ्यां धान्यमाषाभ्यां सम्पदुपेताभ्यां गौरसर्षपाभ्यां वा सह दध्नि प्रक्षिप्य पुष्ये ऋक्षे पिवेत। तथैवापरान् जीवकर्षभकापामार्गसहचरकल्कांश्च युगपदेकैकशो यथेष्टं वाप्युपसंस्कृत्य पयसा। यथा कनकमयान् राजतानायसांश्च पुरुषकान् अग्निवर्णान् अनुप्रमाणान् दध्नि पयसि उदकाञ्जलौ वा प्रक्षिप्य पिवेदनवशेषतः पुष्येण।

---

१—अथ कललीभूते यावत् स्त्रीपुरुषाद्युत्पत्तिप्रधान। व्यक्तिर्न भवति तावत् व्यक्तेः प्राक् प्रथमे मासि पुंसवनादि प्रयोजयेत्। —अरुणदत्तः

IGNCA RAR
ACC. No. R 326

भवन्ति चात्र—

बलीपुरुषकारो हि दैवमप्यतिवर्त्तते ।
पुष्ये पुरुषकं हैमं राजतं वाथवायसम् ॥
कृत्वाग्निवर्णं निर्वाप्य क्षीरे तस्याञ्जलिं पिवेत् ।
क्षीरेण श्वेतबृहतीमूलं नासापुटेस्वयं ॥
पुत्राय दक्षिणे सिञ्चेद् वामे दुहितृवाञ्छया ।
पयसा लक्ष्मणामूलं पुत्रोत्पादस्थितिप्रदम् ॥
नासयास्येन वा पीतं वटशुङ्गाष्टकं तथा ।

इति पुंसवनंनाम षष्ठोऽध्याय ।

---

## गर्भव्यापन्नाम सप्तमोऽध्यायः ।

मातापित्रोश्च नास्तिक्यादशुभैश्च पुराकृतैः ।
वातादीनाञ्च कोपेन गर्भोविकृतिमाप्नुयात् ॥

*आदौ गर्भस्रावरूपां व्यापत्तिमाह—*

सा चेदपचाराद्द्वयोस्त्रिषु वा मासेषु पुष्पं पश्येन्नास्या गर्भः स्थास्यतीति विद्यात् । अजातसारा हि तस्मिन् काले भवन्ति गर्भाः ।

*दृष्टेऽपि पुष्पे यदा गर्भः स्थास्यति तदाह—*

सा चेच्चतुष्प्रभृतिषु मासेषु क्रोधशोकासूयेर्ष्याभयत्रासव्यवाय-व्यायामसङ्क्षोभसन्धारणविषमाशनशयनस्थानक्षुत्पिपासाद्यतियोगात् कदाहाराद्वा पुष्पं पश्येत् तस्या गर्भस्थापनविधिमुपदेक्ष्यामः ।

*गर्भस्थापनविधिमाह—*

पुष्पदर्शनादेव एनां ब्रूयात् शयनं तावन्मृदु . सुखशिशिरास्तरण-संस्तीर्णमीषदवनतशिरस्कं प्रतिपद्यस्वेति। ततो यष्टिमधुकसर्पिर्भ्यां परमशिशिरवारिणि संस्थिताभ्यां पिचुमाप्लाव्य उपस्थसमीपे स्थापयेत्। तस्याः तथा शतधौतसहस्रधौताभ्यां सर्पिर्भ्यां अधोनाभेः सर्वतः प्रदिह्यात्। उदकं वा सुशीतं अवगाहयेत्। क्षीरिणां कषायद्रुमाणाञ्च स्वरसपरिपीतानि चेलानि ग्राहयेत्। पद्मोत्पलकुमुदकिञ्जल्कान् चास्यै समधुशर्करान् लेहार्थं दद्यात्। शृङ्गाटकपुष्करबीजकशेरुकान् भक्षणार्थं। समधुशर्करं रक्तशालीनामोदनं मृदुसुरभिशीतं भोजयेत्। तथा क्रोधशोकायासव्यवायव्यायामतश्चाभिरक्षेत्। सौम्याभिश्चैनां कथाभिर्मनोऽनुकूलाभिरुपासीत तथास्या गर्भस्तिष्ठति।

Indira Gandhi National
Centre for the Arts

*पतिते तु गर्भे यत्करणीयं तदाह—*

आमगर्भेतु पतिते मद्यानामन्यतमं सामर्थ्यतः पाययेत् गर्भकोष्ठविशुद्ध्यर्थं अर्तिविस्मरणार्थञ्च। ततः प्रीणनैर्बलानुरक्षिभिरस्नेहैराहारैः आदोषधातुक्लेदशुद्धेः।

*आमगर्भेत्वसम्यङ्निःसृते गर्भाशयात् तत्प्रतीकारमाह—*

आमगर्भशेषेण हि पुनःपुनः शूलमनुसज्येत। तस्मात्तीक्ष्णैरनवशेषयन्नुपाचरेत्। ततः परं स्नेहपानैर्बस्तिभिराहारैश्चदीपनीय-पाचनीय-जीवनीयबृंहणीयमधुरवातहरैरिति।

*गुल्मरूपां व्यापत्तिं सचिकित्सामाह---*

वातकफावृतमार्गाणां त्वप्रवर्त्तमानं पित्तलैरुपचरैस्तत् प्रवर्त्तमानं सशुक्रं अशुक्रं वा जीवरहितं वातलान्यासेवमानाया योषितो गर्भलिङ्गानि दर्शयन् गुल्मोभवति। तत्रगुल्मचिकित्सामीक्षेत।

*वातोदराणां व्यपत्तिं तच्चिकित्साञ्चाह—*

कदाचिद् वा गर्भ इव वातोदरं भवति। तद्वातोपशमनैरुपशाम्यति।

*तस्यैवावस्थान्तरमाह—*

तदेव कदाचिदार्त्तवं सौम्यैर्बृंहणात्मभिराहारविहारैस्तम्भित मनुपद्रवमेवोदरं गर्भाधिष्ठितमिव वर्द्धयति येन तामगर्भा गर्भिणीमाहुर्मूढाः। ततो विपरीतैर्यदृच्छया वा प्रवृत्ते रक्ते गर्भशरीरमपश्यन्तोभूतहृतमित्यज्ञा ब्रुवते।

*अपरां व्यापत्तिमाह—*

यस्याः पुनर्महति जातसारे गर्भे वर्ज्यानामवर्जनात् पुष्पदर्शनं स्यादन्यद्वा योनिस्रवणं, तस्यास्तन्निमित्ते वायुः प्रकुपितः पित्तश्लेष्माणौ परिगृह्य गर्भस्य रसवहां नाड़ीं प्रतिपीड्य अवतिष्ठते। ततो नाड्यां दोषैः कुल्यायामिव तृणपत्रादिभिः प्रतिच्छन्नायां रसस्य असम्यग्वहनात् गर्भवृद्धिमनाप्नुवन् उपविशत्युपशुष्यति वा।

*उपविष्टकाख्यां व्यापत्तिमाह—*

तत्र यस्या कदाचित्कार्त्तवपरिस्रावादल्पी च दृश्येते सततं च

गर्भः प्राप्तात् परिमाणादपरिहीयमान एव स्फुरति न च कुक्षिर्विवर्द्धते तमुपविष्टकमित्याचक्षते ।

*उपशुष्ककाख्यां व्यापत्तिमाह—*

यदा तु प्रतिमासमार्त्तवं प्रत्यहं वा परिस्रवणं नात्यल्पं च तथा परिहीयमानो गर्भः चिरात् किञ्चित् स्पन्दते । कुक्षिश्चवृद्धोऽपि परिहीयते तदुपशुष्ककं नागोदरञ्च । तौ तु मातुराहारतेजसाऽल्पेनाप्यायमानौ यदा पुष्टौ स्यातां तदा वर्षगणैरपि प्रमदा प्रसूयत एव ।

*दोषभेदेनोपविष्टकोपशुष्ककयोर्लक्षणमाह—*

तत्र वातेनोपविष्टकोपशुष्ककयोर्वायुः प्रतिहन्यते, सशब्दं फेनिलं विच्छिन्नं शकृदुपवेश्यते, मूत्रमुपरुध्यते, कटीपृष्ठहृदयेषु वेदना, जृम्भा निद्रानाशोऽभीक्ष्णं प्रतिश्यायः, शुष्ककासः, सादः, क्ष्वेलेते इव कर्णौ, तुद्येते इव शङ्खौ, पिपीलिकाभिरिव संसृज्यते शरीरं, परिकृन्तन्निव वायुर्भ्रमति कुक्षौ, तम इव प्रवेश्यते, दुःखेनान्नस्य जरणं, अहरहः परिहानिः । स्फुटितविवर्णपरुषत्वक्त्वञ्च भवति । पित्तेन ताम्रहरितमुपवेश्यते, धूमकः, अम्लकः, छर्दिः, मूर्च्छा, कुक्षिहृदयदाहः, पीतरक्तगोमूत्राभनेत्रमूत्रनखत्वं काली दुर्बला नित्यशूला च नारी भवति । श्लेष्मणा मधुरास्यत्वमुत्क्लेशः श्लेष्मोद्वमनं, भक्तद्वेषः, श्वेतहस्तपादनेत्रता, कासःश्वासश्च ।

*उपविष्टकोपशुष्ककयोश्चिकित्सामाह—*

तयोर्जीवनीयबृंहणीयमधुरौषधसिद्धानां सर्पिषामुपयोगः । तथा पयसां रसानां आमगर्भानां च गर्भवृद्धिकरः । तथा सम्भोजनमेतै-

रेवच घृतादिभिः। सुभिक्षाया अभीक्ष्णं यानवाहनादिभिः क्षोभणमार्ज्जनजृम्भणैरुपपादनं। अथ विशेषेण वाते पूर्वमेव सैन्धवोपहितं क्षीरवस्तिं दत्वा शीतोदकस्नातां मृदु शाल्योदनं भोजयेत्। ततो विदार्य्यादिगण-साधितेन सर्पिषानुवासयेत्। निवातञ्च सेवेत। पित्ते विदारीनिर्यूहसिद्धं पयः पिवेत्। तिस्रः स्थूलकुक्कटीर्निस्तूषमाषाढ़कं च क्षीरोदकेनोदूखले संक्षुद्य तद्रसेन सर्पिषा च तित्तिर कपिञ्जलान्यतररसं साधयित्वा पाययेत्। उपविष्टकविवर्द्धनार्थं उपशुष्ककवृंहणार्थं च। अजासर्पिषा क्षीरेण जीवनीयैश्च संस्कृतां यवागूं पिवेत्। पयस्या-काकोलीद्वय-सुनिषण्णककल्केन पयसा च सर्पिर्विपचेत्। तत्कालं क्षीरानुपानमुपयुञ्जीत। कफे त्वानुपोदकपिशितोपदंशामच्छसुरां त्रिरात्रं पञ्चरात्रं सप्तरात्रं वा पिवेत्। तिलमुद्गमाषलवणविल्वपत्रैः पञ्चभिर्घृतपात्रं संयोज्य स्वनुगुप्तं निधापयेत्। ततः प्रातः पिण्डं विल्वमात्रं शृतशीतं छागदुग्धानुपानं प्राश्नीयात्। अत्रैव वा वदरचूर्णपात्रमपि निदध्यात्। एवमवृद्धौ तक्ष्णैर्विरेचयेत् अपरापातनीयैश्च पातयेत्।

*लीनाख्यां व्यापत्तिमाह—*

यस्याः पुनर्वातोपसृष्टस्रोतसि संलीनो गर्भः प्रसुप्तो न स्पन्दते तं लीनमित्याहुः।

*तच्चिकित्सामाह—*

तत्र श्येनोत्क्रोशगोमत्स्यगोधाशिखिकुक्कुटतित्तिरीणामन्यतमस्य रसेन भूरिसर्पिष्केण माषयूषेण मूलकयूषेण वा घृताढ्येन रक्तशा-

ल्योदनं भोजयेत् । सक्तून् वा तिलमाषविल्वशलाटुयुक्तान् पयसा पाययेत् । मद्यमांसोपदंशं वा मार्द्वीकं । तैलेन चाभीक्ष्णं उदर-वंक्षणोरुकटीपार्श्वपृष्ठान्यभ्यञ्ज्यात् । मुहुर्मुहुश्चैनां हर्षयेत् पूर्वोक्तं चेक्षेत ।

*उदावर्त्तरूपां व्यापत्तिमाह—*

यस्या पुनरुदावर्त्तविबन्धःस्यात् तां वातहरस्निग्धान्नपानैरुपा-चरेत् । अष्टमे तु मासे मधुरकसिद्धेन तैलेनानुवासयेत् । उदावर्त्तो हि समुपेक्षितः सहसा सगर्भां गर्भिणीं अतिपातयेत् ।

*वातकृतां गर्भव्यापत्तिमाह—*

यदा च लब्धगर्भा अन्वंक्षमेव वातलानि आसेवते तदा अस्या वायुः प्रकुपितः शरीरमनुसर्पन् गर्भाशये अवतिष्ठमानो गर्भस्य जड़-बधिरमूकमिन्मिनगद्गदखञ्जकुब्जवामनहीनाङ्गाधिकाङ्गत्वानि अन्यं वा वातविकारं करोति ।

*पित्तकृतां व्यापत्तिमाह—*

तथा वायुवत् पित्तमपि खलतिपलितश्मश्रुहीनतात्वक्नखकेशपैङ्ग-ल्यादीनि ।

*श्लेष्मकृतां व्यापत्तिमाह—*

श्लेष्मा तु कुष्ठकिलाससदन्तत्वादीनि । त्रिवर्गो मिश्रान् विका-रान् । अपिच दृष्टिभागमप्रतिपन्नं तेजो जात्यन्धत्वं तदेव वातानु-गतं विकृतरूक्षारुक्षाक्षं पित्तानुगतं पिङ्गाक्षं श्लेष्मानुगतं शुक्लाक्षं रक्तानुगतं रक्ताक्षमिति ।

*गर्भिण्या आहारविहारविशेषाद् गर्भस्य विकृतिविशेषमाह—*

विवृतशया नक्तञ्चारिणी चोन्मत्तं जनयति। कलहशीला अपस्मारिणम्। व्यवायशीला दुर्वपुषमह्रीकं स्त्रैणं वा। शोकनित्या भीरुमपचितमल्पायुषं वा। स्वप्नशीला निद्रालुमबुधमल्पाग्निं वा। मद्यनित्या तृष्णालुमल्पस्मृतिमनवस्थितं वा। मत्स्यमांसनित्या चिरनिमेषं स्तब्धाक्षं वा। मधुरनित्या प्रमेहिणं मूकमतिस्थूलं वा। अम्लनित्या रक्तपित्तिनं त्वगक्षिरोगिणं वा। लवणनित्या शीघ्रवलिपलितं खलतिकं वा। तिक्तनित्या शोषिणमबलमपचितं वा। कटुकनित्या दुर्बलमल्पशुक्रमनपत्यं वा। कषायनित्या श्यामं अनाहिनं उदावर्त्तिनं वा।

*गर्भस्याष्टानां विकृतीनां नामानि तद्धेतुजिज्ञासा च—*

कस्माद्द्विरेता पवनेन्द्रियो वा, संस्कारवाही नरनारिषण्डः।
वक्रीतथेर्ष्याभिरतिः कथं वा सञ्जायते वातिक षण्डको वा॥

*कस्माद्द्विरेताः जायते ?*

बीजात् समांशादुपतप्तबीजात् स्त्रीपुंसलिङ्गी भवति द्विरेताः।

*कस्मात् पवनेन्द्रियोजायते ?*

शुक्राशयं गर्भगतस्य हत्वा करोति वायुः पवनेन्द्रियत्वम्।

*कस्मात् संस्कारवाही जायते ?*

शुक्राशयद्वारविघट्टनेन संस्कारवाहं हि करोति वायुः।

*कस्मात् नरनारीषण्डोजायते ?*

मन्दाल्पबीजावबलावहर्षौ क्लीवौ च हेतुर्विकृतिद्वयस्य।

*कथं वक्री जायते ?*

मातुर्व्यवायप्रतिघेन वक्री स्याद् वीजदौर्बल्यतया पितुश्च ।

*कथमीर्षाभिरति जायते ?*

ईर्षाभिभूतावपि मन्दहर्षावीर्षारतेरेव वदन्ति हेतुम् ।

*कथं वातिकषण्डो जायते ?*

वाय्वग्निदोषाद्वृषणौ तु यस्य नाशं गतौ वातिकषण्डकःसः ।

इत्येवमष्टौ विकृतिः प्रकाराः कर्मात्मकानामुपलक्षणीयाः ॥

*नागोदराख्यां व्यापत्तिमाह—*

उपवासव्रतकर्मपरायाः स्नेहद्वेषिण्या वातप्रकोपान्यासेवमनाया गर्भो न वृद्धिं प्राप्नोति परिशुष्कत्वात् । स चापि कालान्तरमवतिष्ठतेऽतिमात्रं स्पन्दनञ्च भवति । तत्तुनागोदरमित्याचक्षते ।

*अनुक्तान् व्यापत्तिविशेषानाह—*

ऋतुस्नाता तु या नारी स्वप्ने मैथुनमाचरेत् ।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ॥
मासि मासि विवर्द्धेत गर्भिण्या गर्भलक्षणम् ।
कललं जायते तस्या वर्जितं पैतृकैर्गुणैः ॥
सर्प-वृश्चिक कुष्माण्ड विकृताकृतयश्च ये ।
गर्भास्त्वेतेस्त्रियाश्चैवं ज्ञेयाः पापकृता भृशम् ॥

इति गर्भव्यापन्नाम सप्तमोऽध्यायः ।

Indira Gandhi National Centre for the Arts

# अथ सूतिकागारप्रवेशोनामाष्टमोऽध्यायः

*प्रसवकालमवैकारिकमाह—*

तस्मिन्नेकदिवसातिक्रान्तेऽपि नवमं मासमुपादाय प्रसवकालमित्याहुरादशमान्मासात्। एतावान् कालोऽवैकारिकः।

*सूतिकागारं विवृणोति—*

प्राक् चैवास्या नवमात् मासात् अपहृतास्थिशर्कराकपाले प्रशस्ते देशे वास्तुविद्याप्रशस्तं सर्वर्तुसुखं उपहृतसर्वोपकरणं सन्निहितप्रज्ज्वलनं प्राग्द्वारमुदग्द्वारं वा सूतिकागारं कारयेत्।

*अत्रोपहरणीयान्याह—*

तत्र वैल्वानां काष्ठानां तिन्दुकैङ्गुदानां भल्लातकानां वारुणानां खादिरानां वा यानि चान्यान्यपि ब्राह्मणाः शंसेयुरथर्ववविदस्तद्वसना-लेपनाच्छादना-पिधान-सम्पदुपेतं वास्तु विद्याद्। हृदययोगेनाग्निसलिलोदूखलवर्च्चः स्थानस्नानभूमिमहानसमृतुसुखञ्च। तत्र सर्पिः-तैल-मधु-सैन्धव-सौवर्च्चल - काललवण-विडङ्ग-गुड़-कुष्ठ किलिम-नागर-पिप्पलीमूल-हस्तिपिप्पली-मण्डूकपर्णी-एला - लाङ्गली वचा-चव्य-चित्रक-चिरविल्व-हिङ्गु-सर्षप - लसुन - कणक - कर्णिकारनीप-अतसी-वल्लीज-भूर्ज्जाः कुलत्थ-मैरेय-सुरासवा सन्निहिताःस्युः। तथा अश्मानौ द्वौ, द्वे चण्डमूषले, द्वे उदूखले खरो वृषभश्च, द्वे च तीक्ष्णौ सूचीपिप्पलकौ सौवर्णराजतौ, शस्त्राणि च तीक्ष्णायसानि, द्वौ च विल्वमयौ पर्यङ्कौ, तैन्दुकैङ्गुदानि च काष्ठानि अग्निसन्धुक्षणानि।

*सूतिकागारप्रवेशमाह—*

तत्रानुकूलेषु नक्षत्रादिषु पुण्याहशब्देन गोब्राह्मणवृद्धान्नत्वा आवर्त्तमानाप्रदक्षिणं प्रविश्य बहुशः प्रसूताभिरनुरक्ताभिरविषादाभिः क्लेशक्षमाभिः परिवृता स्वस्त्ययनपरा अनुलोमैराहारविहारैरनुलोमितवातमूत्रपुरीषा प्रसवकालमुदीक्ष्ये। स्वल्पेऽपि विण्मूत्रविबन्धे फलवर्त्तीः प्रणिदद्यात्।

*आसन्नप्रसवाया लक्षणमाह—*

तत्रासन्नप्रसवायाःक्लमोग्लानिर्मुक्तबन्धने इवाक्षिणी, निष्ठीविका मूत्रपुरीषबाहुल्यं, शिथिलकुक्षिता, अधोगुरुत्वं अन्नानभिलाषः, वेदनोदरहृदयकटीवस्तिवंक्षणेषु, तोदभेदशूलस्फुरणस्रवणानि च योन्यां भवन्ति। तदनन्तरं आवीनां प्रादुर्भावो गर्भोदकप्रवाहश्च।

Indira Gandhi National Centre for the Arts

*उपस्थितगर्भायाः परिचर्यामाह—*

अथैनामुपस्थितगर्भां स्वभ्यक्तां उष्णोदकपरिषिक्तां सघृतां यवागूं पाययेत्। ततः सुरक्तार्षभचर्म प्रच्छदे मृदुनि भूमिशयने कृतोपधाने शयानां उत्तानां आभुग्नसक्थिपृष्ठां अहतवाससोऽशङ्कनीयाः प्रियदर्शनाः परिणतवयसः प्रजननकुशलाः प्रगल्भाः क्लृप्तनखाः स्त्रियः सूतिकां सुनृताभिर्वाणीभिराश्वासयन्त्यः पर्य्युपासीरन्। अथास्यै दद्यात् कुष्ठैलालाङ्गली चव्यवचाचित्रकचिरविल्वचूर्णं उपाघ्रातुं मुहुर्मुहुः। पार्श्वपृष्ठकटीसक्थिदेशान् कोष्णेन तैलेनाभ्यज्यानुसुखं तस्या मृद्नीयात्। एवं अवाक् परिवर्तते गर्भः। तस्य लक्षणं त्वयन्त्येनां आव्यः। नचेदेवं परिवर्तते ततो मुहुर्मुहुश्चंक्रमणं

जृम्भणञ्च कारयितव्यम्। अतःपरं अनुशिष्यात् अनागतयां वेदनायां मा प्रवाहिष्ठाः पूर्वं शनैः शनैः प्रवाहिष्ठाः, निर्गमे गाढं गर्भस्य, योनिमुखप्रतिपत्तौ गाढ़तरमाप्रसवादिति।

गर्भश्चोपस्थितकाले जन्मनि प्रसूतिमारुतयोगात् परिवृत्त्या अवाक्शिराः निष्क्रामत्यपत्यपथेन अनुचापरा च्युता। एषा प्रकृतिः विकृतिरतोऽन्यथा। परन्त्वत एव स्वतन्त्रवृत्तिर्भवति।

*अपरापातनादिकमाह—*

अथ प्रसूताया नचेदपरा पतति ततो दक्षिणेन पाणिना नाभेरुपरिष्टाद् बलवदुत्पीड्य पृष्ठत उपसंगृह्य विधुनुयात्। वेण्या अङ्गुल्या वा केशवेष्टितया च कण्ठतालु परामृशेत्। लाङ्गली-मूलकल्केन वा पाणिमुदरंचालिम्पेत्। स्निग्धे वा क्लृप्त-नखेन हस्तेनापहरेत्। तस्याश्चेत् स्वस्थानतो योनिर्भ्रंश्येत् ततो यस्य कस्यचिच्छोणितेनाभ्यज्य योनिं यथास्थानं कुशला स्त्री निवेश-येत्। निविष्टा चाशोकरोहिणी वर्हिषोशीरप्रियङ्गुदेवदारुकङ्क-विपक्वेण तलेन बहुशः स्वेदयेत् पूरयेत्।

इति सूतिकागारप्रवेशोनामाष्टमोऽध्यायः

# गर्भशल्याहरणं नाम नवमोऽध्यायः

*अन्तर्मृते शिशौ यल्लक्षणं दृश्यते तदाह—*

विवृद्धे तु गर्भे स्तब्धं स्तिमितं शीतं अश्मगर्भमिवोदरमाभाति। शूलमधिकमुपजायते न च स्पन्दते गर्भः। नाव्यः प्रादुर्भवन्ति। न स्रवति योनिः, अक्षिणी चास्य स्रंस्येते तथा भृशमरतिपरीता, व्यथतेऽन्यथा चेष्टते, ताम्यति, भ्राम्यति, रोदिति अहर्निशं, न स्वपिति, प्रत्युच्छ्वासात् कृच्छ्रात् श्वसिति, अतिकष्टं प्राणिति क्षयतीत्येवंविधां स्त्रियं मृतगर्भां विद्यात्।

*मूढगर्भमाह—*

तं तु गर्भं कदाचित् असम्यगपत्यपथं अनेकधा प्रतिपन्नं विगुणेन वायुना पीड़ितं मोहितञ्च मूढ़गर्भमाहुः। विगुणानिलप्रतिपीड़नवैचित्र्यात् असंख्यगतिञ्च।

*मूढगर्भस्य गतिं संस्थानञ्चाह—*

समासतस्तु त्रिविधा गतिः ऊर्द्धा तिर्यङ्न्युब्जा च। संस्थानानि पुनरष्टौ, तान्यत्रैवोत्तरत्र वक्ष्यन्ते।

*सूतिक्लेशान्मृतेमातरि-सङ्गवशान्मृते वा मूढगर्भे यत् कर्त्तव्यं तदाह—*

तेषु सर्वेष्वपि विपरीतेन्द्रियार्थां आक्षेपयोनिभ्रंशसम्बरणमक्कलश्वासभ्रमाभिपन्नां शीतगात्रां पूत्युद्गारां विवर्जयेत्। न तु क्षणमप्युपेक्षेत् मृतं गर्भशल्यं। तद्धि निरुच्छ्वासीकृत्य आशु जननीं हन्यात। सचेतनश्च गर्भः शस्त्रेण विदार्यमानो हि जननीमात्मानञ्चैव घातयेत्। तस्मात् तत्सङ्गे सूत्यः प्रयतेरन्।

*मूढगर्भस्य सङ्गाननुक्त्वा तत्प्रतीकारानाह—*

त्रिविधस्तु सङ्गो भवति। शिरस्यंशे जघने वा। मूढगर्भस्य तु जरायुपातनसामान्यं कर्मेत्येके। मन्त्रादिकमाथर्ववेदविहितमित्येके। इष्टकर्मणा शल्यहर्त्रा शल्याहरणमित्येके।

*शस्त्रकर्म कष्टतममिति दर्शयितुमाह—*

तत्त्वतः कष्टतममस्ति शस्त्रकर्म। यतो यान्यकृत्प्लीहान्त्रगर्भाशयादीनां मध्ये ताननुपहिंसता अस्पर्शवता शस्त्रमवदार्य्यं।

*हस्तेनाहरणमपि न सुकरमिति दर्शयन् कर्त्तव्यातामुपदिशति—*

उत्कर्षापकर्षणव्यावर्त्तनोत्कर्त्तनच्छेदनभेदनपीड़नर्जूकरणानि चैकेन पाणिना कार्य्याणि। तस्मादीश्वरं आपृच्छ्य परं च यत्नमास्थाय तद्विद्यसहितस्तं उपक्रमेत् अक्रियायां ध्रुवं मरणम्।

*यथा गर्भमाहर्त्तव्यं हस्तेन तदाह—*

अथोत्तानायाव्याभुग्नसक्थ्यावस्त्राधारकोन्नमितकटि प्रदेशायाश्च धन्वनगमृत्तिकाशाल्मलीपिच्छाघृतैरभ्यज्य हस्तं योनिञ्च गर्भमाहरेत्।

*अष्टौ सङ्गानुल्लिख्य तत्र षट्स्वाहरण-कौशलमुपादिशति—*

(१) तत्र सक्थिभ्यामागतस्य—अनुलोम्याच्छिन्नमेव आहरेत्।

(२) एकस्मिन्सक्थ्निप्रपन्नस्य—इतरंसक्थिप्रसार्य आहरेत्।

(३) स्फिग्देशागतस्य—स्फिग्देशं प्रतिपीड्य ऊर्द्ध्वमुत्क्षिप्य सक्थिनी प्रसार्य्य आहरेत्।

(४) तिर्य्यगागतस्य—परिवर्त्य वा अपरार्द्धमुत्क्षिप्य पूर्वार्द्ध अपत्यपथं प्रत्यार्जवमानीय आहरेत्।

(५) पार्श्ववृत्तशिरसः—अंशंप्रतिपीड्यऊद्ध्वंमुत्क्षिप्य शिरोऽपत्यपथमानीय आहरेत् ।

(६) बाहुद्वयप्रपन्नस्य—ऊद्ध्र्वमुत्पीड्य अंशौ शिरोऽनुलोममानीय निर्हरेत् ।

*आहर्त्तुमशक्यौ द्वौ सङ्गावाह—*

(७) यस्त्वाभुग्नमध्यः पादपाणिशिरोभिर्योनिं प्रतिपद्यते ।

(८) यश्चाभुग्न एवैकेन पादेन योनिं द्वितीयेन पायुं तौ मूढौ हस्तेनाहर्त्तुं अशक्यौ इति शस्त्रमवचारयेत् ।

*हस्ताहरणाऽयोग्यस्य मूढगर्भस्याहरणार्थं शस्त्रकर्माह —*

अथ स्त्रियमाश्वास्य मण्डलाग्रेणाङ्गुलिशस्त्रेण वा विदार्य शिरःकपालान्याहृत्य शङ्कुना गृहीत्वा चिबुके तालून्युरसि कक्षायां वाऽपहरेत् अभिन्नशिरसं वाक्षिकूटे गण्डे वा । तथा अंशसंसक्तस्य अंशदेशे बाहुं छित्वा दृतेरिवाध्मातस्य वातपूर्णमुदरं अवदार्य्य निरस्यान्त्राणि शिथिलीभूतमाहरेत् । जघनसक्तस्य जघनकपालानि दारयित्वेति ।

भवन्ति चात्र—

यद् यद् वायुवशादङ्गं सज्जेद् गर्भस्य खण्डशः ।
तत् तत् छित्वा हरेत् सम्यक् रक्षेन्नारीञ्च यत्नतः ।

*मृते मातरि गर्भे च जीविते यत् कर्त्तव्यं तदुपादिशति—*

वस्तिद्वारे विपन्नाया कुक्षिः प्रस्पन्दते यदि ।
जन्मकाले ततः शीघ्रं पाटयित्वोद्धरेच्छिशुम् ।

इति गर्भशल्याहरणं नाम नवमोऽध्यायः ।

# अथ सूतिकोपचरणीयो नाम दशमोऽध्यायः

अथ सूतिकां बलातैलेनाभ्यज्यात्। बुभुक्षितां पञ्चकोल चूर्णेन, यवानि, उपकुञ्चिका चव्यचित्रकव्योष सैन्धवचूर्णेन वा युक्ता-महःपरिणामिनीं यथासात्म्यं स्नेहमात्रां पाययेत्। स्नेहायोग्यां वातहरौषधक्वाथं ह्रस्वपञ्चमूलक्वाथं वा पीतवत्याश्च यमकेनाभ्यज्य वेष्टयेदुदरं वस्त्रेण। तथा न वायुरुदरविकृतिमापादयेदनवकाशत्वात्। जीर्णे तु स्नेहे पूर्वौषधैरेव सिद्धां क्षीरेण वा यवागूं सुस्विन्नां द्रवां मात्रया पाययेत्। प्राक्स्नेहयवागूपानाभ्यां चोभयकालमुष्णोदकेन परिषेचयेत्। एवं त्रिरात्रं पञ्चरात्रं सप्तरात्रं वाऽनुपाल्य ततो यवकोलकुलत्थयूषेण लघुना चान्नपानेन द्वादशरात्रात् परं जाङ्गल-रसादिभिश्च क्रमदाप्याययेदग्निबलादीन्यपेक्ष्य। क्वथित शीतञ्च तोयं पाययेत्। तथा जीवनीय बृंहणीय-मधुर-वातहरसिद्धै-रभ्यङ्गोत्सादनपरिषेकावगाहैरन्नपानैश्च हृद्यै रुपाचरेत। क्रोधाया-समैथुनादीन् परिहरेत्। एवं हि गर्भवृद्धिक्षपितशिथिल-सर्व-शरीरधातुप्रवाहणवेदना-क्लेद-रक्त-निःस्रुतविशेषशून्यशरीराच्च पुन-र्नवोभवत्यत एव च सूतिकाया व्याधिः कृच्छ्रसाध्यो भवत्यसाध्यो वा। तस्मात्तां यथोक्तेन विधिना प्रयत्नेनोपचरेत्। एवं साध्यर्द्ध-मासमुपसंस्कृता क्रमेण विमुक्ताहारविहारयन्त्रणा विगतसूतिकाभि-धाना स्यात्। पुनरार्त्तवदर्शनादित्येके।

प्रसूता हितमाहारं विहारञ्च समाचरेत्।
व्यायामं क्रोधं मैथुनं शीतसेवां विवर्जयेत्।

सर्वतः परिशुद्धा स्यात् स्निग्धपथ्याल्पभोजना ।
स्वेदाभ्यङ्गपरा नित्यं भवेन्मासमतन्द्रिता ।
प्रसूता सार्द्धमासान्ते दृष्टे वा पुनरार्त्तवे ।
सूतिकानामहीना स्यादिति धन्वन्तरेर्मतम् ।
व्युपद्रवां विशुद्धाञ्च विज्ञाय वरवर्णिनीम् ।
ऊर्ध्वं चतुर्भ्यो मासेभ्यो नियमं परिहारयेत् ।

स्वस्थवृत्तमेतत् सूतिकायाः ।

*गर्भशल्यानिर्हरणानन्तरं सूतिकोपचरणीयमाह--*

एवं निर्हृतशल्याञ्च सिञ्चेदुष्णेन वारिणा ।
दद्यादभ्यक्तदेहायै योनौ स्नेहपिचुं ततः ।
योनिर्मृदुर्भवेत्तेन शूलं चास्य प्रशाम्यति ।
दीप्यकातिविषारास्नाहिङ्ग्वेलापञ्चकोलकात् ।
चूर्णं स्नेहेन कल्कं वा क्वाथं वा पाययेत् तथा ।
त्रिरात्रमेवं सप्ताहं स्नेहमेव ततः पिबेत् ।
सायं पिबेदरिष्टं वा तथा सुकृतमासवम् ।
शिरीषककुभक्वाथ पिचून् योनौ च निःक्षिपेत् ।
उपद्रवाश्च येऽन्येस्युस्तान्यथास्वमुपाचरेत् ।

इति सूतिकोपचरणीयो नाम दशमोऽध्यायः ।

Indira Gandhi National Centre for the Arts

# अथ सूतिकारोगविज्ञानं नामैकादशोऽध्यायः

*मक्कल्लक्षणं तत्प्रतीकारश्चाह—*

प्रजातायास्तुनार्य्यारूक्षशरीरायातीक्ष्णैरविशोधितं रक्तं वायुना तद्देशगतेन अतिसंरुद्धं नाभेरधः पार्श्वयोर्वस्तौ बस्ति- शिरसि वा ग्रन्थिं करोति। ततश्च नाभिवस्त्युदरशूलानि भवन्ति। सूचिभिरिव निस्तुद्यते भिद्यते दीर्य्यते इव पक्वाशयः। समन्तादाध्मानमुदरे मूत्रसङ्गश्च भवतीति मक्कल्लक्षणं। तत्र यवक्षारचूर्णम्वा सुखोदकेन पिप्पल्यादिचूर्णं वा। अंशुमतीद्वयकाथेनभद्रदारुमरिचकल्कम्। पुराणगुड़ं वा त्रिकटु-त्रिजातकधनिकाचूर्णसंसृष्टं। भार्गीनागर-देवदारुकल्कं वा उष्णाम्भसा।

Indira Gandhi National
Centre for the Arts

*सूतिकारोगलक्षणमाह—*

अङ्गमर्दोज्वरः कम्पः पिपासा गुरुगात्रता।
शोथः शूलातिसारौच सूतिकारोगलक्षणम्।
मिथ्योपचारात संक्लेशात् विषमाजीर्णभोजनात्।
सूतिकायाश्च ये रोगा जायन्ते दारुणाः स्मृताः।
ज्वरातिसारशोथाश्च शूलानाहबलक्षयाः।
तन्द्रारुचिप्रसेकाद्याः कफवातामयोद्भवाः।
कृच्छ्रसाध्या हि ते रोगाः क्षीणमांसबलाश्रिताः।
ते सर्वे सूतिकानाम्ना रोगास्ते चाप्युपद्रवाः[1]।

इति सूतिकारोगविज्ञानं नामैकादशोऽध्यायः।

---

१-सूतिकारोग लक्षणमिति सूतिकारोगएव लक्षणं अङ्गमर्दादिव्यतिरिक्तानां

# प्रसूति-तन्त्र-परिशिष्टम्

## अथ असृग्दरविज्ञानं नाम प्रथमोऽध्यायः

*निदानमाह—*

विरुद्धमद्याध्यशनादजीर्णाद् गर्भप्रपातादतिमैथुनाच्च ।
यानाध्वशोकादतिकर्षणाच्च भाराभिघाताच्छयनाद्दिवा च ।

*सामान्यलक्षणमाह—*

असृग्दरं भवेत् सर्वं साङ्गमर्दं सवेदनम् ।

*आर्त्तवातिप्रवृत्तौ उपद्रवानाह—*

तस्यातिवृत्तौ दौर्बल्यं भ्रमो मूर्च्छा मदस्तृषा ।
दाहः प्रलापः पाण्डुत्वं तन्द्रारोगाश्च वातजाः ।

Indira Gandhi National
Centre for the Arts

*सख्यामाह—*

तं श्लेष्मपित्तानिलसन्निपातैश्चतुःप्रकारं प्रदरं वदन्ति ।

---

रोगाणामनभिधानात् । अङ्गमर्द इत्यादि । एते अङ्गमर्दादयः प्रायेण सूतिका रोगत्वेनैव लक्ष्यन्त इत्यर्थः । संक्लेशाद् दोषजनकादन्नात् । ज्वरातिसारादीना मङ्गमर्दादिभ्यः पृथक् पुनरुपादानं रोगाधिक्यं कृच्छ्रत्वमुपद्रवञ्च ख्यापयितुम् । कफवातामयोद्भवा इत्यस्य तन्द्रारुचिप्रसेकाद्या इति विशेषणम् । कफवातजे विकारे सति येषामुद्भवस्ते कफवातामयोद्भवाः ज्वरातिसारादयः कृच्छ्रसाध्या इत्यर्थः । ते सर्वे सूतिकानाम्नेति—ते ज्वरादयः सर्वे सूतिकाभवत्वेन आश्रयाश्रितयोरभेदोपचारात् सूतिका इति नाम्ना कथ्यते । ते चापि उपद्रवा उक्तानां रोगाणां अन्यतमं प्रधानीकृत्य भवन्ति । —व्याख्यामधुकोषः

*कफजस्य लक्षणमाह—*

आमं सपिच्छाप्रतिमं सपाण्डु पुलाकतोयप्रतिमं कफात्तु ।

*पित्तजस्य लक्षणमाह—*

सपीतनीलासितरक्तमुष्णं पित्तार्त्तियुक्तं भृशवेगि पित्तात् ।

*वातजस्य लक्षणमाह—*

रुक्षारुणं फेनिलमल्पमल्पं वातार्त्ति वातात् पिशितोदकाभं ।

*त्रिदोषजस्य लक्षणमाह—*

सक्षौद्रसर्पिर्हरितालवर्णं मज्जप्रकाशं कुणपं त्रिदोषात् ।

*त्रिदोषजस्यासाध्यत्वमाह—*

तच्चाप्यसाध्यं प्रवदन्तितज्ज्ञा ।
न तत्र कुर्वीत भिषक् चिकित्सां ।

Indira Gandhi National
Centre for the Arts

*असाध्यलक्षणमाह—*

सश्वत् स्रवन्तीमास्रावं तृष्णादाहज्वरान्विताम् ।
क्षीणरक्तां दुर्बलाञ्च तामसाध्यां विनिर्दिशेत् ।

*शुद्धार्त्तवलक्षणमाह—*

मासान्निष्पिच्छदाहार्त्ति पञ्चरात्रानुवन्धि च ।
नैवातिबहुलात्यल्पमार्त्तवं शुद्धमादिशेत् ।
शशासृक्प्रतिमं यच्च यद्वा लाक्षारसोपमं ।
तदार्त्तवं प्रशंसन्ति यच्चाप्सु च विरज्यते ।

इत्यसृग्दरविज्ञानं नाम प्रथमोऽध्यायः ।

# अथ कन्दरोगविज्ञानं नाम द्वितीयोऽध्यायः

*निदानमाह—*

दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात् ।
क्षताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा ।
पूयशोणितसङ्काशं निकुचाकृतिसन्निभं ।
उत्पद्यते यदा योनौ नाम्ना कन्दः स योनिजः ।

*वातजस्य लक्षणमाह—*

रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत् ।

*पित्तजस्य लक्षणमाह—*

Indira Gandhi National
Centre for the Arts

दाहरागज्वरयुतं विद्यात् पित्तात्मकन्तु तं ।

*कफजस्य लक्षणमाह—*

नीलपुष्पप्रतीकाशं कण्डुमन्तं कफात्मकं ।

*सर्वात्मकस्य लक्षणमाह—*

सर्वलिङ्गसमायुक्तं सन्निपातात्मकं विदुः ।

इति कन्दरोगविज्ञानं नाम द्वितीयोऽध्यायः ।

# अथ योनिव्यापद् विज्ञानं नाम तृतीयोऽध्यायः

*योनिव्यापदां निदानपूर्विकां संप्राप्तिमाह—सुश्रुतः—*

प्रवृद्धलिङ्गं पुरुषं यात्यर्थमुपसेवते।
रूक्षदुर्बलबालायास्तस्या वायुः प्रकुप्यति।
स दुष्टो योनिमासाद्य योनिरोगाय कल्पते।
मिथ्याचारेण ताः स्त्रीणां प्रदुष्टेनार्त्तवेन च।
जायन्ते वीजदोषाच्च दैवाच्च शृणु ताः पृथक्।

*वाग्भटस्त्वाह—*

विंशतिर्व्यापदो योनेर्जायन्ते दुष्टभोजनात्।
विषमस्थानशयन भृशमैथुनसेवनैः।
दुष्टार्त्तवादपद्रव्यै र्वीजदोषेण दैवतः।

*वातजां योनिव्यापदमाह—चरक—*

वातलाहारचेष्टाया वातलायाः समीरणः।
विवृद्धो योनमाश्रित्य योनेस्तोदं सवेदनम्।
स्तम्भं पिपीलिकासृप्तिमिव कर्कशतां तथा।
करोति सुप्तिमायासं वातजांश्चापरान् गदान्।
सा स्यात् सशब्दरुक्फेनतनुरूक्षार्त्तवाऽनिलात्।

*वाग्भटस्त्वाह—*

योनौ क्रुद्धोऽनिलः कुर्य्यात् रुक्तोदायामसुप्तताः।
पिपीलिकासृप्तिमिव स्तम्भं कर्कशतां स्वनम्।

Indira Gandhi National Centre for the Arts

फेनिलारुण-कृष्णाल्प तनुरक्षार्त्तव-स्रुतिम् ।
स्रंसं वंक्षणपार्श्वादौ व्यथां गुल्मं क्रमेण च ।
तांस्तांश्च स्वगदान् व्यापद् वातिकी नाम सा स्मृता ।

*पित्तजां योनिव्यापदमाह—चरक—*

व्यापत् तथाम्लवणक्षाराद्यैः पित्तजा भवेत् ।
दाहपाकज्वरोष्णार्त्ता नीलपीतसितार्त्तवा ॥
भृशोष्णकुणपस्रावा योनिः स्यात् पित्तदूषिता ॥

*वाग्भटस्त्वाह—*

यथास्वैर्दूषणैर्दुष्टं पित्तं योनिं समाश्रितम् ।
करोति दाहपाकोषा पूतिगन्धज्वरान्विताम् ।
भृशोष्णभूरिकुणप-नीलपीतसितार्त्तवाम् ।
सा व्यापत् पैत्तिकी रक्तयोन्याख्याऽसृगतिस्रुतेः ।

*कफजां योनिव्यापदमाह—चरक—*

कफोऽभिष्यन्दिभि र्वृद्धो योनिञ्चेद् दूषयेत् स्त्रियाः ।
सशीतां पिच्छिलां कुर्य्यात् कण्डूग्रस्ताल्पवेदनाम् ।
पाण्डु वर्णां तथा पाण्डु पिच्छिलार्त्तववाहिनीम् ।

*सर्वजां योनिव्यापदमाह—चरक—*

समश्नत्या रसान् सर्वान् दूषयित्वा पयो मलाः ।
योनिगर्भाशयस्थाःस्वैर्योनिंयुञ्जन्ति लक्षणैः ।
सा भवेद्दाहशूलार्त्ता श्वेतपिच्छिलवाहिनी ।

*रक्तजां व्यापदमाह—चरक—*

रक्तपित्तकरैर्नार्या रक्तं पित्तेन दूषितम् ।
अतिप्रवर्त्तते योन्या लब्धे बीजेऽपि साऽप्रजा ।

*अरजस्कामाह—चरक—*

योनिगर्भाशयस्थं चेत् पित्तं संदूषयेदसृक् ।
सारजस्का मता कार्श्य वैवर्ण्यजननी भृशम्[1] ।

*अचरणामाह—चरक—*

योन्यामधावनात् कण्डूं जाताः कुर्वन्ति जन्तवः ।
सा स्यादचरणा काण्ड्वा तयाऽतिनरकांक्षिणी[2] ।

*अतिचरणमाह—चरक—*

पवनोऽतिव्यावायेन शोफसुप्तिरुजः स्त्रियाः ।
करोति कुपितो योनौ सा चातिचरणा मता ।

*प्राक्चरणमाह—चरक—*

मैथुनादतिबालायाः पृष्ठजङ्घोरुवंक्षणम् ।
रुजन् दूषयते योनिं वायुः प्राक्चरणा हि सा ।

*चरणाद्वयस्य लक्षणमाह—सुश्रुत—*

मैथुनाचरणात् पूर्वं पुरुषादतिरिच्यते ।
बहुशश्चातिचरणादन्या वीजं न विन्दति ।

---

१—इयमरजस्कैव सुश्रुते रुधिरक्षया वाग्भटे च लोहितक्षया नाम्ना पठ्यते ।
२—इयमेव वृद्धवाग्भटे विप्लुता इति नाम्ना पठ्यते ।

*उपप्लुतामाह—चरकः—*

गर्भिण्याः श्लेष्मलाभ्यासाच्छर्दिश्वासविनिग्रहात् ।
वायुः क्रुद्धः कफं योनिमुपनीय प्रदूषयेत् ।
पाण्डुं सतोदमास्रावं श्वेतं स्रवति वा कफम् ।
कफवातामयव्याप्ता सा स्याद् योनिरुपप्लुता।

*परिप्लुतालक्षणमाह—चरकः—*

पित्तलाया नृसंवासे क्षवथूद्गारधारणात् ।
पित्तसंमूर्च्छितोवायु र्योनिं दूषयति स्त्रियः ।
शूना स्पर्शाक्षमा सार्त्ति नीलपीतमसृक् स्रवेत् ।
श्रोणिवंक्षणपृष्ठार्त्तिज्वरार्त्तायाः परिप्लुता[1] ।

*विप्लुतापरिप्लुतयोर्लक्षणमाह—सुश्रुतः—*

Indira Gandhi National
Centre for the Arts

विप्लुता नित्यवेदना ।
परिप्लुतायां भवति ग्राम्यधर्मे रुजाभृशम् ।

*उदावर्त्तिनीमाह—चरकः—*

वेगोदावर्तनाद् योनिमुदावर्त्तयतेऽनिलः ।
सा रुगार्त्ता रजःकृच्छ्रेणोदावृत्तं विमुञ्चति ।
आर्त्तवे सा विमुक्ते तु तत्क्षणात् लभते सुखम् ।
रजसोगमनादूद्र्ध्वं ज्ञेयोदावर्त्तिनी बुधैः[2] ।

---

१—वृद्धवाग्भटे तु—"बस्ति-कुक्षि-गुरुत्वातिसारारोचक-कारिणीत्यधिकं पठ्यते ।

२—इयमेव सुश्रुतावाग्भटयोरुदावर्त्तेति नाम्ना पठ्यते ।

*कर्णिनीलक्षणमाह—चरकः—*

अकाले वाहमानाया गर्भेण पिहितोऽनिलः
कर्णिकां जनयेद् योनौ श्लेष्मरक्तेन मूर्च्छितः।
रक्तमार्गावरोधिन्या सा तया कर्णिनी मता।

*पुत्रघ्नीलक्षणमाह—चरकः—*

रौक्ष्याद् वायुर्यदा गर्भं जातं जातं विनाशयेत्।
दुष्टशोणितजं नार्याः पुत्रघ्नी नाम सा मता।

*अन्तर्मुखीलक्षणमाह—चरकः—*

व्यवायमतितृप्ताया भजन्त्यास्त्वत्र पीडितः
वायुर्मिथ्यास्थिताङ्गाया योनिस्रोतसि संस्थितः।
वक्रयत्याननं योन्याः सास्थिमांसानिलार्त्तिभिः।
भृशार्त्ति मैथुनाशक्ता योनिरन्तर्मुखीमता।

*सूचीमुखीलक्षणमाह—चरकः—*

गर्भस्थायाः स्त्रिया रौक्ष्याद् वायुर्योनिं प्रदूषयन्
मातृदोषादनुद्वारां कुर्य्याद् सूचीमुखी तु सा।

*शुष्काख्यां योनिव्यापदमाह—चरकः—*

व्यवायकाले रुन्धन्त्या वेगान् प्रकुपितोऽनिलः।
कुर्य्याद्विण्मूत्रसङ्गार्त्ति शोषं योनिमुखस्य तु।

*तस्या एव लक्षणमाह—वाग्भटः—*

वेगरोधात् ऋतौ वायुर्दुष्टो विण्मूत्रसंग्रहम्।
करोति योनेः शोषञ्च शुष्काख्या सातिवेदना।

वामिनीलक्षणमाह—चरकः—

षड्हात् सप्तरात्राद् वा शुक्रं गर्भाशयं गतम् ।
सरुजं नीरुजं वापि या स्रवेत् सा च वामिनी ।

षण्डीलक्षणमाह—चरकः—

वीजदोषात्तु गर्भस्था मारुतोपहताशया ।
नृद्वेषिण्यस्तनीचैव षण्डीस्यादनुपक्रमा ।

सुश्रुतस्त्वाह—

अनार्त्तवस्तना षण्डी खरस्पर्शा च मैथुने ।

महायोनिलक्षणमाह—चरकः—

विषमात् दुःखशय्यायां मैथुनात् कुपितोऽनिलः ।
गर्भाशयस्य योन्याश्च मुखं विष्टम्भयेत् स्त्रियाः ।
असंवृत्तमुखी सार्त्ती रुक्षफेनास्रवाहिनी
मांसोत्सन्ना महायोनिः पर्ववङ्क्षणशूलिनी[१] ।
इत्येतैर्लक्षणैः प्रोक्ता विंशतिर्योनिजा गदाः ।
न शुक्रं धारयत्येभि दोंषैर्योनिरुपद्रुता ।

---

१—चरकोक्ताविंशतिर्योनिव्यापदोयथा—वातजा - पित्तजा - कफजा-सर्वजा-रक्तजा-अरजस्का-अचरणा-प्राक्चरणा-उपप्लुता-परिप्लुता - उदावर्त्तिनी कर्णिनी-पुत्रघ्नी-अन्तर्मुखी-सूचीमुखी-शुष्कयोनि-वामिनी-षण्डी-महायोनयः ।

सुश्रुतोक्ता यथा—उदावर्त्ता-बन्ध्या-विप्लुता-परिप्लुता-वातलेति-वातजन्याः पञ्च, रुधिरक्षया-वामिनी-स्रंसिनी पुत्रघ्नी-पित्तलेति-पित्तजन्याः पञ्च ; अत्यानन्दा-कर्णिनी-चरणा-अतिचरणा-श्लेष्मलेति श्लेष्मजन्याः पञ्च ; षण्डी-फलिनी-महती-सूचीवक्त्रा-सर्वजेति सन्निपातजाः पञ्च ।

तस्माद्गर्भं न गृह्णाति स्त्री गच्छत्यामयान् बहून् ।
गुल्मार्शः प्रदरादींश्च वाताद्यैश्चातिपीडनम् ।

इति योनिव्यापद्विज्ञानं नाम तृतीयोऽध्यायः ।

---

# गर्भिणीचिकित्सा नाम चतुर्थोऽध्यायः

*तत्रादौ गर्भस्थापनयोगाः—*

मधुकं शाकबीजञ्च पयस्या सुरदारु च ।
अश्मन्तकः कृष्णतिलास्ताम्रवल्ली शतावरी ।
वृक्षादनी पयस्या च तथैवोत्पलसारिवा ।
अनन्तासारिवा रास्ना पद्मामधुकमेव च ।
बृहतीद्वयकाश्मर्य क्षीरिशुङ्गास्त्वचोविसम् ।
पृथक्पर्णी बला शिग्रु श्वदंष्ट्रा मधुयष्टिका ।
शृङ्गाटकं विसं द्राक्षा कशेरुमधुकं सिता ।
मासेषु सप्त योगाः स्युरर्द्धश्लोकास्तु सप्तसु ।
यथाक्रमं प्रयोक्तव्या गर्भस्रावे पयोऽन्विताः ।
कपित्थविल्वबृहती पटोलेक्षुनिदिग्धिकाः ।
मूलानि क्षीरसिद्धानि दापयेद्भिषगष्टमे ।

Indira Gandhi National Centre for the Arts

---

वाग्भटोक्ता यथा—वातिकी-अतिचरणा-प्राक्चरणा-उदावृत्ता-अन्तर्मुखी-सूचीमुखी-शुष्कावामिनी-षण्डी-महायोनि-पैत्तिकी-श्लैष्मिकी-लोहितक्षया-परिप्लुता उपप्लुता-कर्णिनी-रक्तयोनि-विप्लुता-सान्निपातिकी-जातघ्नाः ।

"नवमे" मधुकानन्ता पयस्यासारिवाः पिबेत् ।
पयस्तु "दशमे" शुण्ठ्या श्रृतशीतं प्रशस्यते ।
सक्षीरा वा हिता शुण्ठी मधुकं देवदारु च ।
एवमाप्यायते गर्भस्तीव्रा रुक् चोपशाम्यति ।

*अन्यच्च*——

"प्रथमे मासि" गर्भे तु यदा भवति वेदना ।
चन्दनं शतपुष्पा च शर्करा मदयन्तिका ।
एतानि समभागानि पिष्ट्वा तण्डुलवारिणा ।
पाययेत् पयसाऽऽलोड्य गर्भिणीं मात्रया भिषक् ।
तथा तिलान् पद्मकञ्च शालूकं शालितण्डुलान् ।
क्षीरेण पिष्ट्वा क्षीरेण सिताक्षौद्रान्वितेन च ।
आलोड्य पाययेन्नारीं ततः सम्पद्यते शुभम् ।
तस्मिन् सुजीर्णे दातव्यं भोजनं क्षीरसंयुतम् ।
"द्वितीये मासि" गर्भे तु यदा भवति वेदना ।
तदोत्पलस्य कल्कन्तु शृङ्गाटककशेरुकम् ।
तण्डुलोदकपिष्टन्तु पाययेत् तण्डुलाम्बुना ।
निवार्य्य गर्भशूलञ्च स्थिरं गर्भं करोति च ।
"तृतीये" क्षीरकाकोली काकोल्यामलकीफलम् ।
पिष्टमुष्णोदकेनैतत् पाययेत् गर्भिणीं भिषक् ।
शाल्यन्नं पयसा जीर्णे भोजयेदनु गर्भिणीम् ।
तथा पद्मोत्पलं कुष्ठं शालूकञ्च समांशिकम् ।
सितोदकेन पिष्ट्वा तु क्षीरेणालोड्य पाययेत् ।

तेन शूलं निवर्त्तेत न गर्भो व्यथते ध्रुवम् ।
"चतुर्थे" तु विधानज्ञः पाययेदिदमौषधम् ।
पिष्ट्वोत्पलञ्च शालूकं कण्टकारी त्रिकण्टकम् ।
यथाग्नि मात्रया काले गर्भिणीं पयसा सह ।
तथा गोक्षुरकं सिंही बालकं नीलमुत्पलम् ।
पिष्ट्वा क्षीरेण पातव्यं गर्भशूलनिवारणम् ।
"पञ्चमे मासि" गर्भे तु यदा भवति वेदना ।
तत्र नीलोत्पलं वीरां पिष्ट्वा क्षीरेण पाचनम् ।
घृतक्षौद्रान्वितं पीत्वा गर्भस्य च रुजां हरेत् ।
तथा नीलोत्पलं नारीं काकोलीं समभागिकम् ।
शीततोयेन पिष्ट्वा च क्षीरेणाऽऽलोड्य पाययेत् ।
अनेन विधिना गर्भः स्थिरः स्याद् रुक प्रशाम्यति ।
"षष्ठे मासि" यदा गर्भे वेदना जायते तदा ।
मातुलुङ्गस्य बीजानि प्रियंगु चन्दनोत्पलम् ।
क्षीरेणालोड्य पातव्यं गर्भशूलनिवारणम् ।
तथा पियालबीजानि मृद्वीकालाजशक्तवः ।
एतत् सुशीतलं काले पीत्वा च सुखमश्नुते ।
"सप्तमे" शतपुत्रीञ्च मृणालसहितां पिबेत् ।
पिष्ट्वा क्षीरेण शूलार्त्ता गर्भिणी या सुखार्थिनी ।
कपित्थक्रमुकामूलं सलाजं शर्करायुतम् ।
शीततोयेन संपिष्टं क्षीरेणालोड्य पाययेत् ।
पीत्वा हन्त्यवला शीघ्रं शूलं गर्भसमुद्भवम् ।

Indira Gandhi National

"अष्टमे" तु यदा मासि गर्भे भवति वेदना ।
तदा पिष्ट्वा तु धान्याकं पाययेत् तण्डुलाम्बुना ।
शूलं निवर्त्तते तेन गर्भः संधार्यते स्त्रिया ।
एवं पलाशस्य दलं सुपिष्टं संपीयतोयेन सुशीतलेन ।
अत्यन्तघोराष्टममासगर्भ-व्यथातुरा यान्ति सुखं तरुण्यः ।
गर्भिण्या "नवमे मासि" यदा भवति वेदना ।
एरण्डमूलं काकोलीं पिष्ट्वा शीतोदकेन च ।
पीत्वा शूलाद्विमुच्येत तदा नारी न संशयः ।
तथा पलाशबीजञ्च स काकोलीकुरण्टकम् ।
भक्तेन वारिणा पिष्ट्वा गर्भशूलं व्यपोहति ।
अथवा "दशमे मासि" वेदना जायते यदा ।
तदा नीलोत्पलं यष्टी-मधुकं मुद्गसंयुतम् ।
ससितञ्चाम्भसा पिष्ट्वा क्षीरेणालोड्य पाययेत् ।
दोषश्च नाशयेदेव शूलं गर्भसमुद्भवम् ।

*गर्भशूलहरान् योगानाह—*

कुशकाशोरुबूकानां मूलैर्गोक्षुरकस्य च ।
श्रतं दुग्धं सितायुक्तं गर्भिण्याः शूलनुत् परम् ।
कशेरुशृङ्गाटकजीवनीय - पद्मोत्पलैरण्डशतावरीभिः ।
सिद्धं पयः शर्करयाविमिश्रं संस्थापयेद्गर्भमुदीर्णशूलम् ।
कशेरुशृङ्गाटकपद्मकोत्पलं समुद्गयष्टीमधुकं सशर्करम् ।
सशूलगर्भस्तु तिपीड़िताङ्गना पयोविमिश्रं पयसान्नभुक् पिवेत् ।

*गर्भे शुष्के यत् कर्त्तव्यं तदाह—*

गर्भे शुष्के तु वातेन बालानाञ्चापि शुष्यताम् ।
सितामधुकक्काश्मर्य्यैर्हितमुत्थापने पयः ।
गर्भशोषे त्वामगर्भाः प्रसहाश्च सदा हिताः[1] ।
उपकुञ्चिकां पिप्पलीञ्च मदिरां लाभतः पिबेत् ।
सौवर्चलेन संयुक्तां योनिशूलनिवारणीम् ।

*गर्भपाते रक्तस्रावचिकित्सामाह—*

पारावतशकृत् पीतं शालितंडुलवारिणा ।
गर्भपातान्तरोत्थे तु रक्तस्रावनिवारणम् ।

## गर्भविलास-तैलम्

विदारी दाड़िमं पत्रं रजनी च फलत्रयम् ।
शृङ्गाटकस्य पत्रञ्च जातीकुसुममेव च ।
वरी नीलोत्पलं पद्मं तैलमेतैः पचेत् सुधीः ।
एतद् गर्भविलासाख्यं गर्भसंस्थापनं परम् ।
निहन्ति गर्भशूलञ्च शोणितस्रुतिसंहरम् ।
परंवृष्यतरं ह्येतत् काशिराजेन निर्मितम् ।

इति गर्भिणीरोगचिकित्सा नाम चतुर्थोऽध्यायः ।

---

१—आमगर्भा इति हंसकूर्मादीनामण्डानि । प्रसहाः—कुक्कुटादयः ।

Indira Gandhi National Centre for the Arts

# सूतिकारोगचिकित्सा नाम पञ्चमोऽध्यायः ।

अमृतानागरसहचरभद्रोत्कटपञ्चमूलजलद ।
जलं शीतं मधुसंयुक्तं निवारयति सूतिकातङ्कम् ।
सहचरपुष्करवेतसमूलं विकङ्कतदारुकुलत्थसमम् ।
जलमत्र सैन्धवहिङ्गुयुतं सद्योज्वरसूतिकारोगहरम् ।
दशमुलीकृतः क्वाथः सद्यः सूतिरुजापहः ।

## वज्रकाञ्जिकम्

पिप्पलीपिप्पलीमूलं चव्यं शुण्ठी यमानिका ।
जीरके द्वे हरिद्रे द्वे विड्सौवर्चलं तथा ।
एतैरेवौषधैः पिष्टैरारनालं विपाचितम् ।
आमवातहरं वृष्यं कफघ्नं वह्निदीपनम् ।
काञ्जिकं वज्रकं नाम स्त्रीणामग्निविवर्द्धनम् ।
मक्कल्लशूलशमनं परं क्षीराभिवर्द्धनम् ।
क्षीरपाकविधानेन काञ्जिकस्यापि साधनम् ।

## पञ्चजीरकगुड़ः

जीरकं हवुषा धान्यं शताह्वा वदराणि च ।
यमानी क्रुष्टिकोहिङ्गुपत्रिकाकासमर्दकम् ।
पिप्पली पिप्पलीमूलमजमोदाख वाष्पिका ।
चित्रकञ्च पलांशानि तथान्यच्च चतुःपलम् ।
कशेरुकं नागरञ्च कुष्ठं दीप्यकमेव च ।
गुड़स्य च शतं दद्यात् घृतप्रस्थं तथैवच च ।

Indira Gandhi National Centre for the Arts

क्षीरद्विप्रस्थसंयुक्तं शनैर्मृद्वग्निना पचेत् ।
पञ्चजीरक इत्येष सूतिकानां प्रशस्यते ।
गर्भार्थिनीनां नारीणां बृंहणीये समारुते ।
विंशति व्यापदोयोनेः कासं श्वासं ज्वरं क्षयं ।
हलीमकं पाण्डुरोगं दौर्गन्ध्यं बहुमूत्रताम् ।
हन्ति पीनोन्नतकुचाः पद्मपत्रायतेक्षणाः ।
उपयोगात् स्त्रियोनित्यमलक्ष्मीमलवर्जिताः ।

## लवङ्गादिचूर्णम्

लवङ्गं टङ्कणं मुस्तं धातकी विल्वधान्यकम् ।
जातीफलं सर्ज्जकञ्च शताह्वा दाड़िमं तथा ।
जीरकं सैन्धवं मोचं नीलोत्पलरसाञ्जनम् ।
Indira Gandhi National
Centre for the Arts
अभ्रकं वङ्गकञ्चैव समङ्गा रक्तचन्दनम् ।
विश्वञ्चातिविषा शृङ्गी खदिरं बालकं समम् ।
भृङ्गराजरसैः प्लाव्यं भावयित्वा दिनत्रयम् ।
छागोदुग्धेन मतिमान् गर्भिणीमनुपानतः ।
एतच्चूर्णं प्रदीयेत संग्रहग्रहणीहरम् ।
नानावर्णमतीसारं ज्वरञ्चैव नियच्छति ।
आमरक्तातिसारघ्नं शूलशोथनिसूदनम् ।

## गर्भचिन्तामणिरसः

रसं तारं तथा लौहं प्रत्येकं कर्षमात्रकम् ।
कर्षद्वयं तथा चाभ्रं कर्पूरवङ्गताम्रकम् ।

जातीफलं तथा कोषं गोक्षुरञ्च शतावरी ।
वलातिवलयोर्मूलं प्रत्येकं तोलकं शुभम् ।
वारिणा वटिका कार्या द्विगुञ्जाफलमानतः ।
सन्निपातं निहन्त्याशु स्त्रीणाञ्चैव विशेषतः ।
गर्भिण्या ज्वरदाहञ्च प्रदरं सूतिकामयम् ।

## जीरकाद्यरिष्टः

जीरकस्य तुलाद्वन्द्वं चतुर्द्रोणेजले पचेत् ।
द्रोणशेषे क्षिपेत् तत्र तुलात्रयमितं गुड़म् ।
धातकीं षोड़शपलां शुण्ठीञ्च द्विपलोन्मिताम् ।
जातीफलं मुस्तकञ्च चातुर्जातं यमानिकाम् ।
कङ्कोलं देवपुष्पञ्च पलमानेन निःक्षिपेत् ।
मासं संस्थाप्य भाण्डे च मृत्तिकापरिनिर्मिते ।
ततः कल्कान् विनिर्हृत्य पाययेत् कर्षमात्रया ।
अरिष्टो जीरकाद्योऽयं निहन्यात् सूतिकामयान् ।
ग्रहणीमतिसारञ्च तथा वह्नेश्च वैकृतम् ।

इति सूतिकारोगचिकित्सा नाम पञ्चमोऽध्यायः ।

# अस्रुग्दरचिकित्सा नाम षष्ठोऽध्यायः

## अशोक-घृतम्

अशोकवल्कलप्रस्थं तोयाढ़कविपाचितम् ।
पादस्थेन घृतप्रस्थं जीरकक्काथसंयुतम् ॥
तण्डुलाम्बु त्वजाक्षीरं घृततुल्यं प्रदापयेत् ।
तथैव केशराजस्य प्रस्थमेकं भिषग्वरः ॥
जीवनीयैः पियालैस्तु परुषैः सरसाञ्जनैः ।
यष्ट्याह्वाशोकमूलञ्च मृद्वीका च शतावरी ॥
तण्डुलीयकमूलञ्च कल्कैरेभिः पलार्द्धकैः ।
शर्करायाः पलान्यष्टौ सिद्धशीते प्रदापयेत् ॥
पुष्ययोगेन तत् सर्पिः शनैर्मृद्वग्निना पचेत् ।
पीतमेतद् घृतं हन्ति सर्वदोषसमुद्भवम् ।
श्वेतं नीलं तथा कृष्णं प्रदरं हन्ति दुस्तरम् ।
कुक्षिशूलं कटीशूलं योनिशूलञ्च सर्वगम् ।
मन्दाग्निमरुचि पाण्डुं कृशतां श्वासकामलाम् ।
आयुःपुष्टिकरं वृष्यं बलवर्णप्रसादनम् ।
देयमेतत् परं सर्पि विष्णुना परिकीर्त्तितम् ।

*अपरान् योगानाह—*

अशोकवल्कलक्वाथ श्रृतं दुग्धं सुशीतलम् ।
यथाबलं पिवेत् प्रात-स्तीव्रासृग्दरनाशनम् ।

प्रदरं हन्ति वलया मूलं दुग्धेन मधुयुतं पीतं।
कुशवाव्यालकमूलं तण्डुल सलिलेन रक्ताख्यम् ॥
शमयति मदिरापानं तदुभयमपि रक्तसंज्ञशुक्लाख्यौ।
रक्तपित्तविधानेन प्रदरांश्चाप्युपाचरेत्।
असृग्दरे विशेषेण कुटजाष्टकमाचरेत्।

## पुष्यानुगं चूर्णम्

पाठाजम्ब्वाम्रयोर्मध्यं शिलाभेदरसाञ्जनम्।
अम्बष्ठकीमोचरसः समङ्गापद्मकेशरान्।
वाह्लीकातिविषामुस्तं विल्वं लोध्रं सगैरिकम्।
त्रिफलं मरिचं शुण्ठी मृद्वीका रक्तचन्दनम्।
कट्वङ्गवत्सकानन्ता धातकीमधुकार्जुनम्।
पुष्येनोद्धृत्य तुल्यानि श्लक्ष्णचूर्णानि कारयेत्।
तानि क्षौद्रेण संयुज्य पाययेत्तण्डुलाम्बुना।
असृग्दरातिसारेषु रक्तं यच्चोपवेश्यते।
दोषागन्तुकृता ये च वालानां तांश्च नाशयेत्।
योनिदोषं रजोदोषं श्वेतं नीलं सपीतकम्।
स्त्रीणां श्यावारुणं यच्च तत् प्रसह्य निवर्त्तयेत्।
चूर्णं पुष्यानुगं नाम हितमात्रेयपूजितम्।

## मुद्गाद्यं घृतम्।

मुद्गमाषस्य निर्य्यूहे रास्नाचित्रकनागरैः।
सिद्धं सपिप्पलीविल्वैः सर्पिः श्रेष्ठमसृग्दरे।

## शीतकल्याणकं घृतम् ।

कुमुदं पद्मकोशीरं गोधूमोरक्तशालयः ।
मुद्गपर्णी पयस्या च काश्मरीमधुयष्टिका ॥
बलातिबलयोर्मूल मुत्पलं तालमुस्तकम् ।
विदारी शतमूली च शालपर्णी सजीवका ॥
फलं त्रपुषबीजानि प्रत्यग्रं कदलीफलम् ।
एषमर्द्धपलान् भागान् गव्यं क्षीरं चतुर्गुणम् ॥
पानीयं द्विगुणं दत्त्वा घृतप्रस्थं विपाचयेत् ।
प्रदरे रक्तपित्ते च रक्तगुल्मे हलीमके ॥
बहुरूपञ्च यत् पित्तं कामलावातशोणिते ।
अरोचके ज्वरे जीर्णे पाण्डु रोगे मदे भ्रमे ॥
तरुणी चाल्पपुष्पा च या च गर्भं न विन्दति ।
अहन्यहनि च स्त्रीणां भवति प्रीतिवर्द्धनम् ॥
शीतकल्याणकं नाम परमुक्तं रसायनम् ।

## बृहच्छतावरीघृतम्

शतावरीरसप्रस्थं क्षोदयित्वावपीड़येत् ।
घृतप्रस्थसमायुक्तं क्षीरं द्विगुणितं भिषक् ॥
अत्र कल्कानिमान् दद्यात् स्थूलोडुम्बरसम्मितान् ।
जीवनीयानि यान्यष्टौ यष्टिपद्मकचन्दनैः ॥
श्वदंष्ट्रा चात्मगुप्ता च बला नागबला तथा ।
शालपर्णी पृश्निपर्णी विदारी सारिवाद्वयम् ॥

शर्करा च समा देया काश्मर्य्याश्च फलानि च ।
सम्यक् सिद्धन्तु विज्ञाय तद् घृतञ्चावतारयेत् ॥
रक्तपित्तविकारेषु वातपित्तकृतेषु च ।
वातरक्तं क्षयं श्वासं हिक्काकासञ्च दुस्तरम् ॥
अङ्गदाहं शिरोदाहं रक्तपित्तसमुद्भवम् ।
असृग्दरं सर्वभवं मूत्रकृच्छ्रं सुदारुणम् ॥
एतान् रोगान् शमयति भास्करस्तिमिरं यथा ।

इत्यसृग्दरचिकित्सा नाम षष्ठोऽध्यायः ॥

Indira Gandhi National
Centre for the Arts

# कन्दचिकित्सा नाम सप्तमोऽध्यायः

गैरिकाम्रास्थिजन्तुघ्न रजन्यञ्जनकट्फलाः ।
पूरयेद् योनिमेतेषां चूर्णैः क्षौद्रसमन्वितैः ॥
त्रिफलायाः कषायेण सक्षौद्रेण च सेचयेत् ।
प्रमदा योनिकन्देन व्याधिना परिमुच्यते ॥

इति कन्दचिकित्सा नाम सप्तमोऽध्यायः ।

# योनिव्यापच्चिकित्सा नामाष्टमोऽध्यायः

*अतिचरणादीनां चिकित्सामाह—*

अतिचरणादिषु सर्वास्वनिलजासु वातहरैस्तैलैश्चानुवासनमुत्तरबस्तिश्च। धारयेच्चातिचरणायां यवगोधूमकिण्व कुष्ठशतपुष्पाश्यामाह्वाप्रियङ्गुबलाऽऽखुपर्णीकल्ककृतामुत्कारिकाम्।

*प्राक्चरणादीनां चिकित्सामाह—*

प्राक्चरणाशुष्काविप्लुताकर्णिनीषु तैलमुत्तरबस्तिं दद्यात्। धारयेच्च विप्लुतायां गोमत्स्यान्यतरपित्तेनैकविंशकृत्वो भावितान् क्षौमनक्तकान् किण्वचूर्णमाक्षिकमेवं युक्तमस्याः स्रोतांसि विशुध्यन्ति कण्डूक्लेदशोफाश्च निवर्त्तन्ते।

*कर्णिन्याश्चिकित्सामाह—*

कर्णिन्यां कुष्टार्कपल्लवपिप्पलीसैन्धवैर्बस्तमूत्रपिष्टैर्वर्तिं कृत्वा धारयेत। श्लेष्महरं च सर्वं कर्म।

*उपावृत्तायाश्चिकित्सामाह—*

उपवृत्तायामनूपमांसरसाः क्षीरं स्वेदो दशमूलत्रिवृताक्वाथकल्कसिद्धश्च स्नेहः पानानुवासनोत्तरबस्तिषु।

*योनिस्रंसादीनां चिकित्सामाह—*

योनिस्रंसे च महायोनिप्रभृतिष्वेष एव विधिः। जातघ्नीरक्तयोनिरक्तक्षयासु कुटजकाश्मर्यक्वाथसिद्धं सर्पिरुत्तरबस्तौ दद्यात्। अथवा मृगाजाविबराहरुधिराम्लदधिमधुघृतानीति।

Indira Gandhi National
Centre for the Arts

भवति चात्र—

स्नेहस्वेदनबस्त्यादि वातलास्वनिलापहं ।
कारयेद्रक्तपित्तघ्नं शीतं पित्तक्रियासु च ॥
श्लेष्मलासु च रूक्षोष्णं कर्म कुर्याद्यथायथं ।
सन्निपाते विमिश्रं तु संसृष्टासु तु कारयेत् ॥
स्निग्धस्विन्नां तथा योनिं दुस्थितां स्थापयेत्समां ।
पाणिनोन्नमयेज्जिह्मां संवृतां व्यधयेत् पुनः ॥
प्रवेशयेन्निःसृतां तु विवृतां परिवर्त्तयेत् ।
स्थानापवृत्ता योनि र्हि शल्यभूता स्त्रियो मता ॥

*वामिन्यादीनां चिकित्सामाह—*

वामिन्याप्लुतयोश्चैव स्वेदयित्वा प्रयोजयेत् ।
तर्पणं स्नेहपिचुभिर्भोजनं चानिलापहं ॥
शल्लकीजिङ्गणीजम्बू धवत्वक्पञ्चवल्कलैः ।
कषायैः साधितात् स्नेहात् पर्युपप्लुतयोः पिचुं ॥

*महायोन्याश्चिकित्सामाह—*

कुलीरसूकरवसासर्पिभिर्मधुरैः श्रृतैः ।
पूरयित्वा महायोनिं बध्नीयात् क्षौमनक्तकैः ॥
प्रशस्तां सर्पिषाऽभ्यज्य क्षीरस्विन्नां प्रवेशयेत् ।
बध्नीयाद्वेसवारस्य पिण्डं मूत्रेण कल्कितं ॥
यच्चवातविकाराणां कर्मोक्तं तच्च कारयेत् ।
सर्वव्यापत्सु मतिमान्महायोन्यां विशेषतः ॥

*सामान्याचिकित्सामाह—*

न हि वाताहते योनिर्वनितानां प्रदुष्यति ।
अतो जित्वा तमन्यस्य कुर्याद्दोषस्य भेषजं ॥
पित्तलानां तु योनीनां सेकाभ्यंग पिचुक्रियाः ।
शीताः पित्तजितः कार्याः स्नेहनार्थं घृतानि च ॥
श्लेष्मजानां कटुप्रायाः समूत्रा बस्तयो हिताः ।
पित्ते समधुकक्षीरा वाते तैलाम्लसंयुताः ॥
सन्निपातसमुत्थायाः कर्मसाधारणं हितं ॥

*रक्तयोनेश्चिकित्सामाह—*

रक्तयोन्यामसृग्वर्णै - रनुबन्धमवेक्ष्य च ।
यथादोषोदयं युंज्याद्रक्तस्थापनमौषधं ॥
तिलचूर्णं दधिघृतं फाणितं शौकरी वसा ।
क्षौद्रयुक्तं जयेत्पीतं वातोत्तरमसृग्दरं ॥
वराहस्य रसो मेध्यः सकौलत्थश्च तद्गुणः ।
पत्रकल्को घृते भृष्टो राजादनकपित्थयोः ॥
शर्कराक्षौद्रयष्ट्याह्व नागरैश्च युतं दधि ।
पयस्योत्पलशालूक - बिसकालीयवारिजं ॥
सपयःशर्कराक्षौद्रं रक्तपित्तोत्तरे पिबेत् ।
तण्डुलीयकमूलं वा सक्षौद्रं तण्डुलांभसा ॥

इति योनिव्यापच्चिकित्सा नामाष्टमोऽध्यायः ।

---

IGNCA RAR
ACC. No. R-326

Indira Gandhi National
Centre for the Arts